No. ४२६८

Title मीमांसा तन्त्र वार्तिक टीका न्यायसुधा

Author श्री रणकाचार्यस्य उपनाम: भट्ट सोमेश्वर:

Extent ६०० Age x

Subject पू० मीमांसा शास्त्रं

तंत्रवार्त्तिकटीका न्यायसुधा द्वितीयाध्याय
तृतीयपादः

४२६८

॥ ॥ॐ नमो गणेशाय नमः॥ ॥एकत्वयुक्तमेकस्य श्रुतिसंयोगात्॥ संस्कारादित्वयद्यपि यथासंयोगं विनियोगो न्या
य्यो न विनियोगप्रकारपर्यवसानाद्विनान्तराणामानर्थक्यमाशंक्याह एवमिति॥ संयुक्ते ग्रहादौ संमार्गादेर्विनियोगे स्थि
ते तद्विशेषणैकत्वादिविशिष्टे विनियोगो ग्रहादिमात्रे वेति चिन्तैकवचनादिहेतुकविनियोगविषया कार्येत्यर्थः॥ संस्कारवि
षयाया विशेषचिन्तायाः संस्कारविनियोगचिन्तानन्तरं कार्यत्वशंकानिरासायेदानीमित्युक्तं॥ सर्वशेषविनियोगपर्यवसा
नात्त्वाद्विशेषादेसरस्त्याशयः॥ तल्लब्धन्यायतयैकवचग्रहणस्योद्देश्यस्तसंख्यामात्रोपलक्षणार्थत्वावगमात् द्वित्वबहुत्वयु
क्तमपि वाक्यमुदाहार्यमित्याह यथा चेति॥ ननु पुरोडाशद्वयेणहविर्नाशयोर्निमित्तत्वेनोद्देश्यत्वादुदाहरणत्वसंभवे यथेति
यागत्वस्य प्रयाजशेषस्तिपन्नार्थतायाश्चतुर्थे वक्ष्यमाणत्वात् प्रयाजशेषस्तिपन्नार्थतायाश्चतुर्थे वक्ष्यमाणत्वात्तत्प्रया
द्देश्यत्वेनेह विचारमतुद्देश्यत्वान्नोदाहरणतेत्याशंक्याह सर्वत्र चेति॥ प्रयाजशेषस्तिपन्नार्थत्वे सिद्धितीयावगतेह विशेषसंस्का
रार्थत्वस्यापि संभवतोत्याज्यत्वादेकस्यापि प्रतिपन्नार्थकर्मत्वयोः श्लिष्टरूपद्वदविरोधात्परं वयुक्तद्वयसंस्कारार्थत्वात्संस
स्कार्यत्वेपिह विषाद चतुर्थे वक्ष्यमाणशेषधारणो प्रयोजकत्वात् विरोधादुद्देश्यत्वसंभवतीत्याशयः॥ एवं च सत्युद्देश्य सं

तिष्टोमे पाक्षवे नाविधेयत्वात्सामांतरनिवृत्त्यर्थत्वे सत्तद्विध्यानर्थक्यापत्तेः कर्म्मांतरत्वनिश्चयात्सिद्धांतासंभवेन संदे
हायोगमाशंक्य साम्नयोरपि बृहद्रथंतरसामत्वयोर्यहायता । विशेषविधौ निमित्तार्थकीर्त्तनमिति सूचनार्थो यहायता
विशेषविध्यर्थत्वात् इत्येवं सिद्धांतवचनव्यक्तिः लाघवार्थव्याख्यातं तथैवेत्युक्तं । यदीति संदेहहेतूराष्ट्रप्रकरणाद्बृहद्रथंतर
सामशब्दयोर्ज्योतिष्टोमवाचित्वावगतेः पूर्वपक्षायोगादयुक्तमाशंक्योपपादयितुमाह तत्त इति । सर्वसामकार्येषु रथंत
रमेव बृहदेव वा न सामांतराणीति क्रमेण कृत्वा न रथंतरस्य बृहतो वा संयोगे ज्योतिष्टोमे सामांतरविध्यानर्थक्यापत्तेः संद
योगात्कर्म्मांतरत्वं रथंतरं बृहद्वास्तवत्येवेति सन्नामात्रेण रथंतरस्य बृहतो वा क्रतुसंयोगे कर्म्मांतरतेत्याशयः । नन्वेवम
ति बृहद्रथंतरयोर्विशेषणत्वेन सामांतरव्यावर्तकत्वावगतेः कृत्स्नक्रतुसंयोगस्य वक्तुमशक्यत्वात्सिद्धांतानुपपत्तेः संदेहो
नयुज्यते इत्याशंक्यासन्नाद्याह बृहदपि बृहद्रथंतरयोः पाक्षिकत्वाद्विशेषणत्वोपपत्तेर्न तन्मात्रेण कृत्स्नक्रतुसंयोगसिद्धिरि
ति परिहारसंभवेपि श्रोत्राकृतेरेव विशेषणत्वास्फुरणपगमेनसिद्धांतसंभवं वक्तुमाह तत्त सिध्यर्थमपीति । विशिष्टानुवाददो
षापत्तेर्विशेषणविशेष्यत्वायोगमाशंकते । नन्वेवेति । सर्वपक्षेनावच्छिन्नतैवनाऽस्तीति परिहरति तवेदिति । केवलबृहद्रथंत

दा॰ द्वि॰ २

२

2

रसामकत्वस्याशास्त्रत्वान्निमित्तत्वं न संभवतीत्याशयः। न च सिद्धांते यथा सत्वादेव केवलबृहद्रथंतरसामकत्वस्य निमि-
त्तत्वं न संभवतीत्याशंक्याह निमित्तत्वमपि चेति। समासस्वीकृत्यवगतस्य केवलरथंतरसामकत्वस्य केवलबृहत्सामक-
त्वस्य वाशास्त्रत्वान्निमित्तत्वायोगेपि रथंतरत्वबृहत्त्वस्य वा निमित्तत्वं संभवात् बृहद्रथंतरयोरसमस्तत्वाद्ध्यो-
माश्रयोर्हन्ताववा विशेषणत्वाल्पकपगमेन विशेष्यत्वाल्पकपगमेन वा बृहद्रथंतरसामकत्वापादनेन निमित्तत्वात् सिद्धांतेभ्यु-
पगंतव्येत्याशयः। न चैवमपि विशिष्टोद्देशवाददोषापत्तेः कथं परिहार इत्यपेक्षायामाह यत्र संबंधाबेति। शुद्धस्य कर्तोः सा-
ध्यावाद्यस्यवविधोनिमित्तत्वायोगाद्धि शिष्टस्यैव निमित्तत्वावगतेर्विशेषणस्योद्देश्यांतर्गतेर्न विशिष्टोद्देशवाददोषा-
पत्तिरित्याशयः। शुद्धस्योद्देश्यत्वायोगे विशेषणस्योद्देश्यांतर्गततान्युपगमेपि वाक्यभेदानापत्तिः सुचनायाद्युपपादिकार-
णतो यथाहुः। सर्वपदसमस्त्वसूत्रशब्दस्यावर्ज्यं सिद्धांतेन्यथा किं तावदिति। ताद्यं प्रकरणोक्तिर्युक्तं ननु राणामप्युपलक्षणा-
र्थत्वे वैय्यर्थ्यं स्यादिति किं तावदिति। सन्निधिलक्षणात्प्रकरणा[illegible] त्सोमशब्दस्य ज्योतिष्टोमविषयत्वप्रतीतेर्बृ-
हत्पृष्ठं संभवति रथंतरपृष्ठं संभवतीति वचनांतरेण बृहद्रथंतरसामेयदिशद्व प्रतीतस्य वा निमित्तत्वस्य शास्त्रापेक्षत्वाद कर्मा-

२

तरत्वेवग्रहायणताविशेषस्य ज्योतिष्टोमश्चयोगवचनेनग्रहणात्प्रकृतेनकथंतावाउग्रहोपपन्नेज्योतिष्टोमश्चचोत्पत्तिशिष्टसा
मान्तरालावेनबृहद्रथंतरविरोधिगुणान्तरानवरोधाद्बृहद्रथंतरयोः सर्वकर्मसंयोगानर्हत्वात्तावेनभेदकत्वानुपपन्नेर्दर्शा
जुहोतीत्यादिवत्स्वपठितकर्मस्थत्वाभिज्ञानादकर्मान्तरत्वेनेत्यर्थः। बृहद्रथंतरसामवलक्षणोगुणश्चकर्मान्तरमाक्षिपेदितिश
र्वपक्षइतिज्ञार्थश्चावयवव्याख्यार्थमितीतितात्पर्यंव्याचष्टे। एवमिति। बृहद्रथंतरसामशब्दयोरसर्वक्रतुसंयोगादित्येवम
र्थोऽभ्युपगमेनहेत्वर्थक्रतुसंयोगादितिसूत्रावयवेपठितेनद्वितीयात्पाठेनशब्दद्वयस्यापिज्योतिष्टोमवाचित्वोपपन्नेहेत्वसिद्धिमा
शंक्यनेतिमश्चेत्यनेनसंयोगा[illegible]कृत्स्नस्वतत्वादित्येवमर्थेनात्यसूत्रावयवे[illegible]ननतन्निरासमुपक्रमस्थतदुपपादनार्थंक
थमित्यादिनातत्संदेहहेतुरुक्तसंज्ञागेवव्याख्यातवानुपेक्ष्यकृत्स्नक्रतुसंयोगोपपादनार्थस्य यदिरथंतरसामेतिकोऽर्थइत्या
दिनाग्रन्थस्यार्थंव्याचष्टेकृतइति। सामर्थ्यस्यैकार्थ्याधीनत्वाद्विशेषणविशेष्यत्वंचविनैकार्थ्ययोगाद्विशेषणत्वापेक्षाद्यस्य तद्वे
त्यशब्देनासाधारण्यंव्याख्यातं। ज्योतिष्टोमस्यचेतिन्वयावयवोऽन्यपादेनव्याख्यातः। यानितिलोऽर्थेनश्लोकंव्याख्याउज्योतिष्टोमे
केवलबृहद्रथंतरसामकत्वालावमात्रेणकथंकर्मान्तरत्वासिद्धिरित्यपेक्षायांकेवलरथंतरसामकत्वेलक्षणाद्वागुणाइदमि
लक्षणाकेवलबृहत्सामकत्व १

द्विंवक्तुमाह गुणश्चेति।तस्मात्कर्मीतरमिति हिशब्दार्थ्यायायाध्याहार्यः।नन्वेन विधेयत्वैव गुणस्य लेदकत्वा द्वृहद्रथंतरसाम
कत्वयोश्च निमित्तत्वेना विधेयत्वान्नलेदकतेत्याह।हह चेति।यदिशब्दोपर्वक्षेनेह निमित्तत्वंगम्यमानं बहुव्रीत्यर्थस्याविद्यमान
त्वगम्येत तस्यैव केवलं बृहद्रथंतरसामकत्वरूपस्याविद्यमानत्वेन निमित्तत्वायोगाद्विधेयत्वेन [illegible] पात्रुकं लेद
कतेत्याशयः।नन्वबहुव्रीत्यर्थस्य निमित्तत्वायोगे ऽपि रथंतरस्य बृहतो वा विद्यमानत्वान्निमित्ततोपपत्स्यत इत्याशंक्याहनै
ति।ननुरथंतरमस्यसामेति विग्रहे रथंतरस्य विशेषत्वप्रतीतेर्निमित्ततोपपत्स्यत इत्याशंक्याह नवेति।विग्रहवाक्यस्या
वैदिकत्वेन समासस्थस्यैव विशेषणविशेष्यत्वस्यायात्यघात्नवचसप्तमीविशेषणेवहुव्रीहाविति विशेषणस्य पूर्वनिपात
स्मृतेः पूर्वनिपाताद्रथंतरस्य विशेष्यतानयुक्तेत्याशयः।ननु तत्रेषपि च रथंतरसंज्ञा वा न रथंतरं क्रतुना विशेषं दृशका
मित्याह नवत दिति।अतो रथंतरमेवास्य सामेति बहुव्रीत्यर्थत्वान्नस्य चायाप्रमदा निमित्तत्वं न संभवतीत्युपसंहरति
तस्मादिति।अतो निमित्तत्वायोगेन विधेयत्वावगतेः केवलरथंतरसामकत्वलक्षणस्य गुणस्य लेदकताद्युक्तेति प्रकृ
तमुपसंहरति।अत इति।निमित्तत्वावेदकस्य यदि शब्दस्य का गतिरित्याशंक्य प्रतीतमपि निमित्तत्वमसंभवात्त्याज्यमि

मकेकत्वंतरे तस्य नित्यत्वेन निमित्तत्वायोगात्पौष्यमात्रे लोकः नन्नुक मंतरिस्यतिदेशात् गायत्रादिसामांतरप्राप्तिः केवलरथंतरसार

त्यविहितं निमित्तत्वान्यथानुपपत्त्या केवल [illegible] रथंतरसामकत्वंतरस्य विधेयत्वकल्पनापत्तेः केवलरथंतरसा
मत्वंन संभवतीत्याशंक्याह। शक्यं हीति। अतिदेशस्योपदेशेन बाधोपपत्तेरित्याशयः॥ श्लोकोत्पादं स्याख्यायसामांतरस्याहृत्या
रथंतरस्य [illegible] ज्योतिष्टोमविशेषणत्वायोगेप्ययोगस्याहृत्या विशेषणत्वं लविष्यतीत्याशंका निरासार्थत्वेन तृतीयपा
दं व्याचष्टे नचेति। रथंतरस्याविशेषात्सर्वसामकार्यविशेषणत्वप्रतीतेः॥ इष्टस्यातिरिक्तेषु च सामकार्येषु तस्यायोगस्याह
त्ते रथ्ययोगात्तसर्वव्यापिविशेषणत्वं संभवतीत्याशयः॥ महावलमिदं चेष्टमित्यादिवत्तत्वविशेषणस्यैव सन्नामात्रेण
निमित्तत्वं लविष्यतीत्याशंका निरासार्थत्वेन द्वितीयं व्याचष्टे नचविशेषणादिति। गायत्रछंदस इत्यादिवत्तत्प्रसामर्थ्यमेवा
स्त्वित्याशंका निरासार्थत्वेनाद्यं व्याचष्टे नचसामर्थ्येनेति। गायत्रछंदः॥ इत्यत्र तीनां उभं जगतत्वेन विधावशक्यत्वादग्न्याद्यथा
कथं विज्ञतिः कल्प्येत्याशयः॥ समासासानावकाशं किंतुमेवाशक्यइत्याह हश्यते चेति। अतः सिद्धाकर्मांतरतेत्याहइतीति।
ज्योतिष्टोम एव तत्त्वैकसामकत्वेन विकल्पेन विधास्यत इत्याशंकते अथेति। विषमशिष्टत्वाद्विकल्पायोगमाह नशक्यमि
तिशतदेवोपपादयति इदं हीति। ननु वंतरेपि तत्त्वैकसामकत्वंन संभवतीत्याशंक्याह नावंतरे चेति। अनेन चनन्वयथेत्याद्याशंकाप

रिहारार्थत्वाद्यार्थेष्याख्यातः। स्वार्थप्रधान्याविघातादपि केवलरथंतरसामकत्वेन तरविधिरेवयुक्त इत्याह एवं वेति। ननु
निमित्तार्थत्वेपि बृहद्वीत्यर्थद्येव निमित्तत्वात्स्वार्थप्राधान्यं न विहन्यत इत्याशंक्याह अयथा हीति। कतोऽक्ष्वरूपेण निमित्त
त्वायोगादित्याशयः। उक्तेन च प्रकारेण केवलरथंतरसामत्वस्यावश्यं विधेयत्वे स्यवहितानुयहे उहे तु मल्लिङ्गत्वेऽयार्थ दि
रथंतरसामेत्यस्य ग्रहाग्र विध्येकवाक्यत्वात्प्रयगमाद्वोदनावाउणानां युगपद्घाद्या दित्यनेन न्यायेनानेकार्थोपादानल
त्वणादपि गुणाकर्मान्तरविधिसिद्धिरित्याह यदि वेति। ऐन्द्रवायववाग्रत्वस्य ग्रहणविशेषणत्वेन याग विशेषणत्वाभावान्न स्व
वस्तुवपदेश ध्यतिदेशलत्यत्वेनाविधेयत्वान्नद्वारापि विधेययाग विशेषणत्वाउपपत्तेः कर्मान्तरस्यार्थैन्द्रवायवाग्रत्वविशि
ष्टस्य विध्ययोगमाशंक्यैन्द्रवायवाग्रत्वविशिष्टसृष्ट्याति परस्तत्पयोक्तासर्वत्वाभावनाविशिष्टयागस्य भावनांतरविध्युपपत्तिः स्वा
वनार्थाग्रहाग्रलावनाविधानशब्देनोक्ता। धान्यर्थात्यादकस्य चाजिनादिगुणस्यात्निरपेक्षत्वभावनाभेदकत्वाभावेऽपि तदुत्
त्पादकस्यसमानाङ्गावनयैवान्वयात्रैन्द्रदकत्वस्व नायासर्वत्वाभावनाविशिष्टयागभावनांतरस्य क्तिः। विधायकस्याऽध्याहानेत
र्थादपि सोमशब्दलक्षितयाग विधिरवसीयत इत्याह सोम इति। नवितिकर्तव्यताउपदेशान्नैवकर्मान्तरविधिर्निर्वहतीत्याशं

क्याह सोमेति। व्याख्यातेऽर्थे साध्यं मेऽसंघते इदमेवेति। वाक्येनेति साध्यावयवं यदि शब्दत्यागरूपाध्याहारपक्षयोर्गृहीयतां वि
धेर्यागविध्येकवाक्यता तावदयुक्तमाशंक्य वाक्यग्रहणं यद्यपि दिरर्थं तरसामासोमश्च्यात्सौलरेणस्तुवीतेति संदंश
शितं यथा वांतरप्रकरणोपलक्षणत्वेनोपपादयितुमाह यहाश्रेति। आहेति साध्येण द्यावा ह्यस्य यदि शब्दो पहतशक्तिर्वा
द्यागविध्ययोगमाशंक्य यदि शब्दत्यागे नानुपपद्यते तो न्यर्थमनन्नमस्त्यादिसाध्यं महावाक्येवांतरवाक्यांशमाध्याद्यु
क्तमाशंक्योपपादयति। अथवा यदीत्यर्थवाशब्दं यदि शब्दत्यागपक्षे निष्प्रयोजनत्वेन परित्यागादिति। ननु कल्पकात्तावान्वो
त्सिन्नामात्रकल्पितो रूपाध्याहारः पूर्वस्येत्याशंक्याह कर्तव्यतेति। विधिनाऽनिष्ठतः प्रवर्त्तयितुमशक्यत्वात्कार्यत्वाद्यथाउ
पपत्त्यारूपविकल्प्यत इत्याशयश्चैकल्पिकत्वसिद्धिश्चरूपाध्याहारप्रयोजनमेवकारेण सूचिता। अथवायुर्थेत्याद्यवाश
ङ्कमध्याहारपक्षनिरासार्थत्वेन व्याचष्टे अध्याहारादपीति। पक्षांतरमप्यथाभूतं यद्भवयति तदेवं मवेत्यर्थः। कथं पुनरि
त्याशंकातात्पर्यं दृष्टांतस्य साध्याविकलतोक्त्यर्थत्वेन व्याचष्टे परश्वेति। यच्छपवंधात्मा ह्यान्नशालितो जनयद्विधेयत्व प्र
तीतिः यत्पयात्स्यपगमेपि दध्नः पयसैव नन्वाशालितो जनं प्रति यदि शब्दावगतनिमित्तत्वायोगात्तदेकवाक्यत्वानुपपन्ने

यद्यपीति

व्याचष्टे

वा.वि.
५

सप्तम्यादिके न वाक्येन विहितत्वोक्तिः कथमित्याशयः उच्यत इति साधेण व्यवहिताव्ययकल्पनया दध्युपसेचनस्थेष्य
माणत्वेनावगतस्थलोप्यर्थे जनार्थत्वेनेष्यमाणतया वाक्षिकान्ययमाश्रजीतेति द्यं जनार्थपयःसाहचर्येणावधारणाङ्गी
जनप्रयुक्तत्वे न तदलावेत्तुष्टानां सिद्धेः कांस्यलोजिद्वायेन्नापसेचनस्य नियमाद्धालिसोजननियमावगतेः सप्तम्यादिकेन

5

वाक्येन लोजनविधिसिद्धिरिति परिहृते नन्वनवैरवाद्वित्यनेन यदिशब्दाव्ययेपुन्छावाविधावतावाक्नेष्यमाणत्वावग
तिः कथं भवतीत्याशंक्याह उत इत्यनेन कामप्रवेदने कच्चितीति कविद्धहोपपदवर्जं कामप्रवेदनेच्छायाः प्रवेदने प्रज्ञापने गम्यमा
ने लिङ्ग्वक्तिस्मरणाल्लिङ्वेष्यमाणत्वावगतिरूपपादिता तत्र कथं प्रत्यये लिङ्ग्रकामप्रवेदनार्थतावगम्यत इत्याशं

म ४

क्याह प्रत्ययेनेति । अगंत्यादिविति गत्यर्थस्याम्रेधातोर्गीवेऽक्तप्रत्ययश्रुत्याद्याउनासिकस्य क्विप्रलोऽक्ङितीतिदीर्घत्वा
दांतं गतम् अवगतमित्यांतशब्दस्य ज्ञानवाविद्वज्जोकसिद्धस्य प्रत्ययकाम [illegible] प्रवेदनार्थत्वज्ञानस्य सिद्धत्वतदांतत्वेति
विग्रहेणोक्तस्य विवरणं कथनमित्यर्थः । एवंजातीयके वाक्ये लोके प्रत्ययकामप्रवेदनार्थत्वप्रतीतेर निष्पन्नस्य वोपसे
चनस्य निमित्तवायोगान्न दिझ्याया निष्पन्नायायदिशब्देन निमित्तवोक्त्यवगतेः सप्तमरिष्याहृतायां लिङः कामप्रवेदना

राम
५

र्थत्वस्यान्याय्यत्वादंगत्वतोपसेवनकर्तृत्वयतयाप्रधानत्वतेष्यमाणस्तोजनात्वेपाशक्तेर्लीजनेष्यमाणत्वोक्तिवैय
र्थ्यप्रसंगाद्यत्ययस्यख्यात्यत्वावगतेर्दृत्ययकामस्यवेदनार्थस्लिङंगीकरणंयुक्तमित्याशयश्च एवमिति दार्ष्टांतिक
लार्थस्यावष्टं तत्रेति। सयदिकलौकिकवाक्येवंविधवाक्यार्थदर्शनेसतीति तत्रशब्दार्थः। यत्यया ऽभ्युपगमस्यकिंप्र
योजनमित्यपेक्षायांविधिशक्तिप्रतिबंधकयदिशब्दापनयनंप्रयोजनमाह ननु श्वेति। अपणविधायिरथंतरसामशब्दानये
त्तवेपिकर्मविधिस्तावत्संभवतीतिपदद्वयोपन्यासेनसूचितं। ननु वंसतीतिलाघवेणग्रहाग्रता विधेयत्वे दिशब्दानयेसत्य
विधायकत्वापत्तेर्ग्रहाग्रता नानुष्ठेया स्यादित्याशंकोद्धृत इत्यादिनापरिहृततत्स्याशयमाह ग्रहानिति। ऐंद्रवायवस्युक्ता
ग्रत्वयोर्विधेयत्वेनेष्टत्वात्तद्वयोरुपन्यसनीयत्वेपितयोरस्वाक्षत्वाद्विधायकाप्रवणेपिविधायककल्पनेनावश्यंवि
धेयत्वस्वचनायाउपन्यासः। इष्यमाणस्यसाध्यत्वावगतेः फलवद्यागानुष्ठानमात्रेणग्रहाग्रत्वासिद्धेः। इष्यकयत्नसा
ध्यत्वाकर्तव्यत्वकल्पनेत्याद्याशयार्थः ग्रहाग्रताविशेषमिच्छतोयागोपदेशेनग्रहाग्रतायायागप्रयुक्तत्वस्वनेनयागांग
त्वबोधनात्सोमयागविधिनैवग्रहाग्रताविशेषस्यापिविधिरितिद्वितीयार्थः। हेतुहेतुमतोर्लिङिति हेतौकारणेस्वार्थाद्या

द५५

वा॰
६

उपष्टानापादकेतत्प्रयोजकोहेतुश्चेति हेतुसंज्ञत्वेनस्मृतेप्रयोजकेहेतुमतिसफलेपरेणस्वार्थमनुष्ठेयंतयापाद्येप्रयोजे
लिङ्गितत्किंस्मृतेःस्यादितिहेतौलिङ् ईद्धीयादितिविधौ ईद्धीयादितिवाहेतुमतिस्यादितिविषावितिपत्तौनत्वरोपन्यासेऽप्
र्वापरितोवेणैवेत्याह विनेवेति। नकेवलंयदिशब्दत्यागमाख्याहाराभ्यांविनेत्यपिशब्दार्थः रथंतरसामेतिनाघ्यंहेतौस्यादितिलि
ङ्गतेरथंतरसाममसोमहेतुकाऐन्द्रवायवाग्रहाःकर्तव्यास्त्येवंविशेषणपरत्वेनव्याख्यामाह तत्त्वेति। यागकर्तव्यतासि
न्यत्त्वेनसिद्धेरित्याशंक्याह नवेति। हेतुमतिईद्धीयादितिलिङ्प्रत्ययेतदेवमैन्द्रवायवाग्रहेत्वरथंतरसामासोमःकर्त्त
व्यइत्येवंव्याख्यानस्यन्यत्वेतावदाह अथवेति। नतुहेतुमतिलिङ्प्रत्ययदिशब्दश्रुत्यवहितान्वयासावेद्यैन्द्रवायवाग्रस्यविशे
षणत्वेनप्रागसिद्धेरन्वादैन्द्रवायवाग्रहान् ईद्धीयाद्यदिरथंतरसामासोमःस्यादितिपदान्वयस्यवाक्यार्थव्याख्यापन्नेर्म
ध्यपतितस्ययदिशब्दस्यपूर्वोत्तरान्वयाहेतुमदर्थलिङ्ग्वयाभ्युपगमेनस्यादितिलिङ्गवृत्त्यासावनिरूपपादायाश्चलिङ्गहेत्व
र्थत्वानुपपत्तेःसोमयागस्यकेनचिद्धेतुनाहेतुत्वानभिधानात्तस्यहेतुत्वोक्तिरयुक्तेत्याशंक्याह। अउक्तमपिवेति। हेतुमताहे
तुमाक्षेपात्सोमएवहेतुरितिकथमवधारणेत्याशंक्यसन्निधेरित्युक्तं। ताध्यंयाचष्टे तत्रापीति। परप्रकरणस्थस्यक्रत्वंत

पि
भाष्यं
६

रथ्यावांतरप्रकरणानिष्पंजकसंदंशश्चव्याख्यायांशाखायांवाक्यंविनायहाप्यविशेषश्यतदंगत्वायोगादंगांगित्वलक्षणार्थ
त्वंश्रयोज्यप्रयोजकत्वाख्यहेतुहेतुमद्भावोक्तेर्वक्तुंकार्यतेम्बार्थमन्यदनुष्ठातेथ्यनेनेतिष्कृत्पन्नेनकारणशब्देनहेतुशब्दोवैया
करणानुसाराद्व्याख्यातः।फलशब्देनचवैयाकरणानांहेतुमद्वृत्याख्यापरार्थापाद्यानुष्ठानत्वलक्षणप्रयोज्यत्वविवरणार्थे
वदृष्टव्या।प्रयत्नग्रहणयोक्तंप्रश्नत्रयपक्षात्प्रत्याति।यदिशब्देति।ननुकिमर्थःसर्वपदेनेतिनिर्बंधइत्यपेक्षायामाहसर्वेति
तस्मादितिसूत्रार्थोपसंहारलाघवंस्पष्टत्वादव्याख्यायबृहद्रथंतरसामसंयोगस्ययद्यायवलक्षणागरूपेशाखानुष्ठानवेलाया
मनिष्पन्नत्वा[illegible]दित्येवंसंयोगस्येतिसूत्रावयवव्याख्यार्थमपिचेतिलाघवंव्याचष्टे किंचेति।कृत्वोरपिग्रहणवेलायाम
निष्पन्नत्वात्कथंहेतुहेतुमद्भावइत्यत्रेतिनिमित्तेत्याशंक्यानिष्पन्नस्याप्यास्वत्वेनवर्तमानत्वान्निमित्तत्वंसंभवतीतिवैधर्म्यदृष्टांतेन
सूचित।श्लोकंव्याचष्टेप्रातःसवनेहीति।अन्यार्थाख्यानुष्ठानापादकत्वाद्यंकारणशब्दःपक्षत्रयाशयेनसमन्वितुक्तं।ननुअथ
पक्षाशयेनाह।अथवेति।कृत्वोरथ्यनिष्पन्नत्वेनानिमित्तत्वाशंकासवेत्यनेननिरस्ता।यदिजगत्सामायथणाग्रानिति जगत्साम
संयोगस्यज्योतिष्टोमेप्रत्यनंगत्वतत्वात्तत्साहचर्यात्बृहद्रथंतरसामसंयोगयोरप्यनंगत्वात्कर्मांतरार्थत्वंपक्वतेत्येवंसंयोग

भूतवाद ५

नस्यसततया

7

ष्ठे तिष्ठन्त्यवयववद्याख्यानार्थमपि च निश्चसंदिग्धमिति तात्पर्यं व्याचष्टे जगत्साम्नेति। जगदाख्यस्य साम्नः कविदत्वा वा जगत्या मृच्यत्वेन तस्य साम्नो जगत्संज्ञत्वं प्रतीतेः साम्नः शब्दस्य रथंतरस्य साम्न इहत्साम्नेति च तुल्यनिर्देशात् पृष्ठसाधनसाम वाचित्वाद्वगते र्विधुवति च महादिवाकीर्त्यं पृष्ठं भवतीति विधानाद्धि हविर्धानित्ति जगत्या तु त्यजनस्य महादिवाकीर्त्यस्य साम्नः पृष्ठसाधनत्वेन विधानादिह विधेत्यं वाग्व्ययणाय त्वं निविशत इति वक्तुं दशमे ज्योतिष्टोमस्य जगत्साम त्वं निवेत्स्यति॥ ॥एकस्य तु लिंगभेदात्प्रयोजननार्थमुच्येतैकत्वं गुणवाक्यत्वात्॥ ॥पूर्वपक्ष निरासद्वारा सिद्धान्तोक्त्यर्थतया तु शब्दं व्याख्यार्थे तु शब्दादित्यादिना॥ प्रकरणग्रहणं चायं पूर्वपक्षे तराणामनुपलक्षणार्थमिति। दर्शयितुमाह सर्वेति। न ज्योतिष्टोमस्य वहायत्र लक्षणगुणविधेः प्रकरणादेवतद्गुणवलाल्लाभात्तथा च सामशब्दो नर्थकः स्यादित्याशंकानिरासार्थमिकस्येत्यादि शब्दावयवं व्याचष्टे। एकस्येव हीति। भावेलकाराख्याख्यानायोद्धारणमित्युक्तं सामस्यादिति कर्मविधिप्रतीतेरिदमाशंक्याह यागविशेषत्वं लक्षणगुणविधानार्थत्वेनाकर्मविधित्वाकर्मत्वेदं निरासार्थं च नैकत्वमिति शब्दावयवं व्याचष्टे गुणेति। न चैतदुक्तमित्यादिना [illegible] इत्यर्थं तरसामशब्दयोरनेकसामकत्वाज्ज्योतिष्टोमे तु पपद्यताशंकानिरासार्थं च न ज्योतिष्टोमस्य बृहद्वा पृष्ठं रथंतरं वा पृष्ठं भवतीति गुणवाक्यान्वयादिहइत्थं

७

विशेषणशब्देनानेकसामकस्यकृतोरेकेनसाम्नाविशेषणाभावेपिदितेननुसामांतरस्यारथ्यारद्दथंतरस्यो ४

तरत्वेनानेकसामकत्वेपिदृहद्रथंतरसामव्यपदेशापत्तेर्नर्दृहद्रथंतरसामवलक्षणात्‌ गुणाद्भेदस्त्येवमेकत्वमितिस्व
त्रावयवस्थस्य चितंश्चारथ्यांतरमाह अथवेति।दृहद्वारथंतरथंतरंवेतिवाक्याद्दृहद्रथंतरयोर्वैकल्पिकत्वावगतेर यो
गयाद्दन्यात्विशेषणत्वसंभवस्वनार्थंश एवाकैरितिवज्रवचनं पुनरितिलाघवंसमासासंभवाउलाघवणार्थत्वेनद्यारस्या
उमाहय त्विति।विशेषणाभावादिति भावकृत्यनेनैर्विशेषणत्वासंभवेपिवैकल्पिकत्वान्यायोगव्याद्दन्या विशेषणत्वंसंभवि
ष्यतीत्याशंकयाप्युक्तेतोर्यत्सामेतिसर्वसामकार्याणिवादेनतत्त्वरथंतरस्यवत्येवेत्ययोगव्याहतेरथ्यापकत्वेनासंभवष्यनव
रथंतरसत्तामात्रंविशेषणमितिवार्त्तिकेनोक्तवात्सामांतरसापेक्षस्यरथंतरस्य विशेषणत्वापत्तेः सापेक्षत्वेनासामर्थ्यात्स
मासविघातःस्यादिति सामांतरेष्वत्यनेनोक्तं तदुच्यतइत्यादिनाष्टोक्तं तावत्परिहारमाह तचेति।शेषोद्याद्यपरिहारांतर
माहविय हइति पूर्वाईस्यावष्टेयादिहीति।फालिकत्वविशेषणफलंनित्यशब्देनोक्तं।स्मार्तस्य लक्षणार्थवक्रशदोक्तायनैरपे
क्ष्यविशेषणफलमव्यस हितस्यवथ्याक्षिविनाविशेषणत्वायोगाडनयस्थक्तं।पाक्षिकत्वान्ययस्ववच्छेदाभावेष्ययोगव्याहृत्या
विशेषणत्वसंभवेयतस्त्वित्यनेनोक्तेनत्वेवकारंविनाविशेषणत्वानलियक्तेयतएवकारस्ततोयद्याहतिरितित्यायनैवको
सदितत्राहनोक्तं।सत्तयैवेत्येवकारेणान्ययवच्छेदव्याथोर्वाथितिनियमस्यान्ययवच्छेदंविनान्यत्र

रा·वि
८
४

रथ्यात्यसामव्यवच्छेदवाचित्वान्नास्ति व्यवच्छेदोपपत्तिरित्याशंक्य यदि चेत्युक्तं। विनाप्येवकारं समाससामर्थ्याद्विशेष
णत्वासिद्धिशक्तिर्यदिशब्देनोक्ता। एवकारापेक्षणे च सन्नाया विशेषणत्वादस्थानाभीतिवाच्यार्थं स्पष्टमवर्थंहत्तिवर्ज्जीत्यु
क्तवान्न एवैवकारस्य योगेनासर्वव्याहृत्तिसिद्धिरित्याशयः। अयद्वेत्यनेनक्षतविशेष्यान्वितेनाप्येवकारेण रथंतरासर्वव्याहृ
त्तिसिद्धेर्नाक्षतसन्नावेत्यावश्यकल्प्य इत्युक्तो कथमप्यानवितेनैवकारेणान्यासर्वव्याहृत्तिसिद्धिरित्याशयेन तन्वेति एष्वे तद्दीत्य
नेनसामरूपतायानित्यत्वेन तद्विषयावधारणानर्थक्यादव्यक्ततोः सामकार्यं करोत्येवेत्यवधारणार्थं त्वप्रतीतेरसतश्च का
र्यकरत्वायोगादसर्वव्याहृत्तिसिद्धिरित्युक्तो। नत्वपात्तिकत्वेपि ज्योतिष्टोमगतसर्वसामकार्य्यां यापि वाक्केवलस्य विशेषण
त्वानुपपत्तेः सामान्तरसापेक्षस्य विशेषणत्वाभ्युपगमापत्तेः समासानुपपत्तिरित्याशंक्यान्यसाहित्वाच्चादित्यनेनशब्दितन्प
रिहारमाह नचेति। इहइदं थंतरे सामनी नवतश्त्यादि वहुत्वनिर्दे शेन दत्तावेपि वा गायत्रामहीयवादि वदेकस्तोत्रविषयत्वेस
त्यन्यसाहित्यं विनाविशेषणत्वायोगात्केवलस्यसापेक्षत्वापत्तिः रथंतरं पृष्ठं भवतीति उसामान्तरनिरपेक्षस्य रथंतरस्य पृष्ठाख्य
स्तोत्रसाधनत्वेन विधानादव्यक्ततोर्यत्सामेत्यनुवादेपि रथंतरस्यापृष्ठस्तोत्रमात्रद्वाराक्रतुसंबंधित्वप्रतीतेः सर्वसामका

८

र्थ्यापि त्वेऽपि विशेषणत्वं संभवान्न सापेक्षत्वापत्तिरित्याशयः । सामशब्दस्य क्रतुसंबंधिरूपवाचित्वेऽपि रथंतरशब्दसमभिव्या-
हारात् पृष्ठमात्रवृत्तिरूपत्वस्य निमित्तत्वावगतेः । पृष्ठमिध्येव रथंतरस्य सामान्तरानपेक्षत्वात् समासाविघातः । प्रौढिमात्रेणोक्ता
परमार्थतस्तु सामशब्दं विनापि क्रतुसंबंधिनो रथंतरस्य निमित्तत्ववतीत्युपपत्तेः । सामशब्दानर्थक्यप्रसंगाद् उक्त्यावैरूप्यस-
माघोऽशीवैराजसामेत्यादिषु पृष्ठार्थैवाप्रकृतिलिंगसंयोगादित्यनेन न्यायेन वैरूपादेः पृष्ठस्थानत्वद्योतनार्थत्वेन सामश-
ब्दस्य पृष्ठलक्षणार्थत्वाद् दूरापास्ता सामान्तरापेक्षेति यद्धेत्यनेनोक्तं । सामशब्दस्य च पृष्ठलक्षणार्थत्वे हि इद्रथंतरयोः स्वाद्विषयत्वेने-
तरेतरव्यावृत्त्यापि विशेषणत्वं संभवतीत्याह अथ वेति । सर्वादीत्याख्यानमुपसंहरति तेनेति । उत्तराईव्याख्यातुमुपक्रमते अथ वा-
स्थिति । विग्रहे यद्विशेष्यत्वमित्यवयवव्याख्यातुं नव क्रतुविशिष्टं रथंतरमिह इष्यतीयत इति पूर्वोक्तं दूषणमनुसंधत्ते न चेति । परि-
हारत्वेन श्लोकावयवव्याचष्टे उच्यत इति । क्रतुसंयोगाभावेन रथंतरस्य विशेषणत्वायोगाद् वैदिकस्यापि च विग्रहत्वाक्यत्वे दिक् य
समासव्याख्यानार्थत्वेन वेदादुमतत्वात् नञ् इतापि विशेष्यता अगत्यांगीक्रियत इत्याशयः । इह त्रिविग्रहयोर्लिंगार्थत्वायोगाद् इत्थं-
तरं साममयव्यासाविति विग्रहव्याख्यपदार्थप्राधान्यार्थत्वावगतेः प्रौढितो भीमादिवद्विशेषणतात्पर्य्यमात्रमत्रापि प्रेतमि

वा·द्वि
९

ति विवक्षितो न्याय्य इति स्थितं । ननु क्रत्वंतरेष्वपि रथंतरस्य फलत्वात् क्रतुना विशेषणं संभवतीत्याशंक्याह यद्यपीति । सर्वांगोपसंहा
रिणा क्रतुप्रयोगविधिना युगपत्सर्वसामग्रहणात् हि नियोगवाक्यस्य च प्रकरणालोचनं विना क्रत्वन्वयाप्रतीतेरैकैकसामा
यानत्वगमात्रैकेन साम्ना क्रतुर्विशेष्टुं शक्यः । सामस्त्येनैकेन क्रतुना पर्यायेणान्वयादेकेन विशेषणोपपत्तिरनंतरमेवोपपाद
यिष्यते । यद्यपि विधितो रथंतरस्य युगपदनेकक्रतुसाधारण्याप्रतीतावपि वाक्यवान्न साधारण्यादष्टैव रथंतरं सामेति क्रत्वं
तरस्यापि हन्याज्ज्योतिष्टोमस्य रथंतरविशेषणत्वासंभवान्नथाप्ययोगस्याहत्या संभवतीत्युपेत्यवादाशयः । परमार्थतस्तु कार्यत्वा
ये विशेषणापेक्षणात्तु वाक्यापातेनैंद्रवायववायव्यलक्षणकार्यविधिनि वरथंतरे ज्योतिष्टोमस्यासाधारण्योपपत्तेर्ज्योतिष्टोमस्यैव
रथंतरमैंद्रवायवाग्रत्वनिमित्तमित्यवाप्तिहित्या विशेषणं संभवत्वत्वमाह एवं वाक्येनेति । देवदत्तस्य गोरानयेत्यादौ वक्तृतो देव
दत्तस्य सद्भावादीनां गोसंबंधस्तुल्यत्वेप्यानयनाक्षितेग क्रियदेवदत्तस्यासाधारण्याद्विशेषणत्वमित्याशयः । दृष्टांतमेवोपपादयति तथा
हीति । गोसंबंधो न देवदत्तस्य केवलः किंतु यज्ञदत्तादेरपि येन गोसंबंधेवाच्यते न चोत्पलस्य नीलं केवलं किंतु रक्तत्वाद्यपि येन न स
देवोत्पलस्यैतेत्येवंयोज्यं वस्तुतो साधारण्ये च विशेषणमनर्थकं स्यादित्याह यदि चेति । अतो देवदत्तस्य गोरित्यादौ वाक्योप

९

स्य ४

त्वानयनादिकार्य्यान्वितगवादिविशेष्यविषयमेवदेवदत्तादेर्विशेषणस्यासाधारण्येनवाच्यत्वंनवाच्यत्वमित्याह तस्मादिति।
नच येषामपिसोमयागानांज्योतिष्टोमाविकारत्वाद्रथंतरसामत्वनिमित्तेद्वाच्यवाच्यत्वप्रसक्तेरिद्वाच्यवाच्यत्वनिमित्तरथंतर
विषयमपिज्योतिष्टोमस्यासाधारण्यंनवर्त्ततीत्याशंक्याह अस्मिंश्चेति। कथंतरस्यरथंतरस्यातिदेशान्निमित्तत्वप्रसक्तावप्युपदेशाज्ज्यो
तिष्टोमस्यैवनिमित्तत्वेनपवमानेवाज्ञेरथंतरंकुर्वतीत्यादौश्रोतान्तस्याक्षनरथंतरवत्तिक्रतवेरथंतरनिमित्तेइवाच्यवाच्यत्वप्र
सक्तिनिहृत्यार्थमिष्टत्वाज्ज्योतिष्टोमस्यापिस्ववाक्योपात्तनकार्य्यान्वितरथंतरविषयमसाधारण्यमस्तीत्यर्थः। ऊहस्यचनिमित्तत्वा
योगान्निमित्तत्वप्रसक्तौतुतत्कालंतन्निर्वाहार्थंविशेषणत्वयाल्पपगमान्नतः॥ विशेषणविशेष्यत्वाभावानपेक्षणाद्यस
ज्ञानत्वेनरथंतरस्यनिमित्तत्वनिषेधादुपपत्तेः। क्रतुरथंतरयोर्मध्येकस्यनिमित्तत्वंकस्यनिमित्तविशेषणत्वमित्यपेक्षायांप्रथमस्य
नीतत्वाद्रथंतरस्यैवनिमित्ततायुक्तेत्याह प्रथमतरेति। इष्यतेपाक्षिकंवक्ष्यतिश्लोकव्याख्यामुपसंहरति तस्मादिति। सत्त्वति
चरथंतरविशिष्टस्यज्योतिष्टोमस्य ज्योतिष्टोमविशिष्टस्यवारथंतरस्यनिमित्तत्वेयदिश्चहत्यागादयस्त्ववारोपिपक्षानस्तुका
स्त्याहस्तीति। शुद्धायाश्चलिङः कामप्रवेदनेहेतुहेतुमतोर्वाप्रयोगात्तावाद्यादिशब्दोक्तस्यानिमित्तत्वस्यानिष्पन्नक्रियाविष

वा॰
१०
10

यत्त्वायोगान्निष्पन्नतदिष्टाविषयत्वाभ्युपगमेन तदुपबद्धाया लिङः कामप्रवेदनार्थतां निमित्तत्वायोगाद्यातदृतेन प्रसन्नयाख्या
नुष्ठानप्रयोजकत्वे नप्रयोजकत्वसाम्यात्स्वार्थीयाऽनुष्ठानप्रयोजकत्वलक्षणयाहेत्वर्थतां [illegible] मप्युमानामनुत्प
त्तिनिमित्तकरान्नोप्यनुवचनविधिविशेषेवारत्नांसि वाए नं तत्पीलेरं नेयर्हि निजायते यर्हि चिरं जायत इत्यस्मात्पत्तिशत्तिवंधकरन्नोति
घातार्थत्वेन राज्ञोप्रीस्त्रात्यर्थे यत्तत्पबद्ध्याप्याजन्मनस्तत्पबद्धरत्नःशसिनिमित्तकनैमित्तिकत्वकीर्त्तनाद्यहिशद्भसमानार्थ
स्यैयदिशहस्यनैमित्तिकत्वाविवत्सत्पापेत्यनङ्तेनाप्यसन्नयाख्यानुष्ठानस्यप्रयोज्यत्वेनप्रयोज्यत्वसाम्यात्परार्थप्रयोज्यस्यानुष्ठानल
क्षणयातदुपबद्धायालिङो हेतुमदर्थतां वक्तुं निमित्तत्वप्रतीतेरवश्याभ्युपगंतव्यत्वात्प्रतीतस्य च निमित्तत्वस्याकारीत्यासंतावित्वेन
त्यागायोगान्नाप्रतीतकामप्रवेदनाद्यर्थग्रहणं युक्तमित्याह नवेति। इहइत्थंतरयोर्ग्रहणवेलायामनिष्पन्नत्वान्निमित्तत्वायोग
स्याप्येत्याद्यनुत्ताषणस्य वंपरिहारस्ताष्यं व्याचष्ट नतेति। लोकेत्वतस्य उत्तजन्मादेरुत्सवादौ वर्त्तमानस्य वृत्तेस्तु सिद्धत्वस्य वा
सेत्तविष्यतश्चवर्षस्य गृहकरणे वेदेत्वउत्त्रजन्मादेरेव वृत्तस्येष्याद्रौ वर्त्तमानस्य दीक्षितत्वस्यादानादिपर्युदासेराविष्यतश्चदर्श
पूर्णमासारंभस्यारंभणीयायां निमित्तत्वदर्शनाद्इत्थंतरस्य तविष्यत्वं निमित्तत्वायोग हेतुत्वेनाना शंकनीयमित्यर्थः। यादृङ्नि

१०

ध्यन्नेनैव निमित्तेन साध्यमित्याद्यर्हस्सत्तः संकल्पितत्वेनानुष्ठितस्यापि भोजनस्यैव स्थालसंमार्जने निमित्तत्वोपपत्तेर्निष्प
न्नकार्यकारित्वान्निष्पन्नत्वोपचारः संभवत्येवेत्याह अपि चेति । स्वकवाक एव वयाज्ञेप्सितिवदौपचारिकत्वद्योतनार्थ एवकारः । एकां
तावधारितत्वमेवोपपादयति ज्या तिष्ठामेति । अंगत्वेदेन सांगप्रधानप्रयोगक्रममेवैकल्पिकांगानवधारणात्कथंचित्प्रयोग
स्य निरूपितैकरूपस्यापेक्षमपूर्वसमाप्त्यसिद्धेरिदं कुर्यामिदं वेति च प्रयोगमध्ये दोलायमानमतेः कालविलम्बे पाक्षप्रयोगनेपु
प्याप्तिसिद्धेः प्रयोगसाकुलतावार्थं वस्तुकेष्टकालेऽपि निरूपितैकरूपप्रयोगात्यागासिद्धेर्वैकल्पिकांगनिमित्तकेष्वनाना विकल्पे
ष्वैन्द्रवायवाग्रहादिषु नानर्त्विजां यजमानस्य सम्प्रतिपत्त्यसिद्धेः प्रयोगस्य कौशलस्यासामर्थ्यादिशङ्कोक्ताया असंप्रतिपत्तेर्वैक
ल्पिकांगावधारणाधीनसिद्धित्वादेवं विधांगकमिदं कर्म कर्तव्यमित्यवधारणपूर्वकमनुष्ठानं नियमाज्ज्योतिष्टोमप्रक्रमे एव र
थन्तरं प्रयोक्ष्यत इत्येकान्तेनावधारितमित्यर्थः । एकान्तावधारणमात्रेण कथं निष्पन्नकार्यकारितेत्याशंक्याह न चेति । एत
देवोपसंहरति तस्मादिति । कृतोऽस्य निमित्तत्वेन वर्तमानमेव निमित्तं न विष्यतीत्याह यदा विति । स्यादिति । तद्यथा वृष्टे न चेति । यदि
त्यादि समाप्यतो दृष्टानुलक्षणः सर्वपरिहारः लाघवं द्वेधा य्याचष्टे य विति । स्वयं साध्या विकल्पत्वं दृष्टान्तस्यैनाह अपि चेति । तस्मादित्य

वा·वि
११
कर्त्त
लक्ष

धिकरणार्थोपसंहारस्तस्माद्यावदुक्तं तस्मादिति ॥ जगत्साम्नोऽथ पूर्वकर्म्मणा सायं वा ज्योतिष्टोमापेक्षया कर्म्मांतरं जगत्साम एतदुक्तं
न विभुवदपेक्षयेति वक्तृवचनेन सूचितं ॥२॥ ॥ अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते ॥ ॥ उदाहरणसाध्यं व्याचष्टे राजेति । सं
देहसाध्यं व्याचष्टे तत्रेति । ब्राह्मणादिलक्षणेन गुणेनेह संदेहः प्रतिपाद्यत्वात्क्रतुश्च प्रयोगागतत्वान्नमात्र सेदकत्वेपपन्नेर्नोत्ये
यागशब्दः प्रयोजनार्थ इति प्रयोगांतरोक्त्या सूचितं । कथमिति साध्येन संदेहहेतुं पृष्ट्वा राजसूयवाक्यस्थो राजशब्दः क्षत्रियमा
त्रवचनो ब्राह्मणादिष्वपि वेति संदेहो हेतुत्वेनोक्तः तस्य साक्षान्मूलसंदेहहेतुत्वाद्योगाद्रूढ्येर्वा यस्य राजसूयेऽधिकारः क्षत्रियमात्र
स्यैवेति मूलसंदेहहेतुस्तत्संदेहहेतुत्वद्वारा मूलसंदेहहेतुत्वं दर्शयितुमाह नानेत्यर्थश्चेति । न राजः क्षत्रियस्याक्षीयादिराजन्यप्रसू
तिनश्चेत्यादिवाक्यस्थस्य राजशब्दस्य क्षत्रियवाचित्वात्ता वा राजसूयवाक्यस्थराजशब्दविषयत्वं विचारस्य वक्तुमधिकारी
त्युक्तं । त्रयाणामपि क्षत्रियस्यैवेति तथैवेत्यनेनातिदिष्टे यो यज्ञा ह्यावक इत्यध्याहारेण स्मरणीयं । केन विधिकारेणेति
यौगिकत्वोक्त्या सूचितं संदेहांतरं वर्णत्रयक्षत्रियमात्रवाचित्वसंदेहहेतुत्वेन दर्शयितुमाह तत्रापीति । चतुर्थ्येर्थे तसिः नतु
राजसूये क्षत्रियमात्राधिकारे यथा तथा नाद्यकामं याजयेदित्येतद्वाक्यविहितेऽवेष्टिप्रयोगांतरे वर्णविशेषानुपादानाद्ब्राह्म
णादे

ते

र्गुणस्य प्राशस्त्येनाविधेयत्वाद्भेदकत्वाद्युपपत्तेः सिद्धान्तासंभवात्संदेहो नन्वुक्त इत्याशंक्याह नन्विति । योगसिद्ध्यधिक
रणन्यायेनैकस्मिन्प्रयोगे फलद्वयसिद्ध्ययोगादन्नाद्यकामावेष्टेः प्रयोगस्य राजसूयान्तर्गतावेष्टेः प्रयोगाद्भेदावगतेः सन्नि
धौ त्वविनाभावादित्यत्र कर्मान्तरविधित्वे निराकरिष्यमाणेऽपि प्रयोगान्तरविधितान्नाद्यकामवाक्यस्यास्त्येवेति सूचयितुं
पृथक्प्रयोगस्यैव वचनमित्येवकारः प्रयुक्तः । राजसूयवाक्यस्यापि फलपरत्वाद्वाक्यभेदापत्तेर्वर्णविशेषानुवादायोगमाशं
क्य कर्तुः प्रयोगाङ्गत्वाद्वाक्यान्तरेण च राजसूयप्रयोगाविधानात्प्रयोगस्योत्पत्तिवत्क्रियाविषयत्वात्फलकर्तृविशिष्टक्रि
याविषयप्रयोगविधौ वाक्यभेदानापत्तिरस्त्वनार्थं प्रयोगे त्वुक्ता ब्राह्मणादिवाक्यानां प्रयोगान्तराविधायित्वे राजसूयमध्य
प्रयुक्ताया एवावेष्टेः संयोगपृथक्त्वात्फलद्वयोपपत्तेस्तस्याश्च विहितत्वात्तत्क्षत्रियकर्तृकत्वाद्ब्राह्मणादिवाक्यवदन्नाद्यकामवाक्ये
कर्त्रन्तराश्रवणेन प्रयोगान्तरानाक्षेपकत्वाद्योगसिद्ध्यधिकरणन्यायेन नैकस्मिन्प्रयोगे फलद्वयसिद्ध्ययोगात्प्रयोगान्तरा
क्षेपेऽपि क्षत्रियस्यैवान्नाद्यकामस्य प्रयोगान्तरोपपत्तेर्वर्णान्तरस्याप्राप्तेर्ब्राह्मणादेर्गुणस्य विधेयत्वाद्भेदकत्वोपपत्तेः संदेहं स
माधत्ते नैतदिति । नन्वन्नाद्यकामशब्देन वर्णान्तरस्याप्युपादानात्कथं तद्वर्णान्तरसंबन्ध इत्याशंक्याह दृष्टान्तद्वयेनोपपादयति

वा·द्वि·
२२

तद्यथेति। अयश्चैतत्प्रवर्तकत्वाद्विधेरस्मिन्सति कुर्यादिति कादाचित्कयाः कार्यद्युतायाविध्यर्थत्वात्कादाचित्केनैव निमि
त्तेनान्वयादधिकारिविशेषणत्वं च तस्मिन्सत्यधिकारान्निमित्तेन तर्गतिर्जातिश्च नित्यत्वेनाधिकारिविशेषणत्वायोगात्कथं
राजशब्दाद्राजत्वलक्षणाधिकारिविशेषावगतिरित्याशंक्याह जातेर्नित्यत्वेनोपादानाशंकेसहत एवाधिका
राक्तत्वविशेषणत्वतायामेवार्थादधिकारिविशेषणतापीत्याशयः। यथा स्यां तर्गते वेष्टिप्रयोगे सोऽकृत्वविशेषो भवति त
थावात्येपीत्यत्यंतसाध्यार्थदृष्टांतोत्तरं। अतोत्राद्यकामवाक्ये ब्राह्मणादिप्राप्तप्रयोगाद्राजशब्दस्य यौगिकत्वे राजस्याधिका
रेण जातिवाचित्वे वा ब्राह्मणो यजेतेत्यादिवाक्ये ब्राह्मणादिप्राप्तिरिति द्वावेव पक्षौ न त्वन्नाद्यकामकामवाक्यात्साप्तिः। शं
कनीयत्वमुपसंहरति तस्मादिति। किंतावदित्यादि सर्वपक्षप्रतिज्ञानार्थं नास्ति ध्याय्यमित्येतदर्थेन ततः शब्देन निमित्तार्थनामि
ध्यार्थवर्णत्रयप्राप्तिसिद्ध्यर्थवर्णत्रयदृष्टनिमित्तार्थता यौगिकत्वस्योक्तेत्यवंध्यावष्टे। किंतावदिति। सहशब्देन राजशब्दस्यापि
वर्णत्रयवृत्तित्वमुक्तं राज्येत्यानेन राज्यपदोनिलाघ्याव यत्वे वा यौगिकशब्दस्य कुलालनापितादिशब्दवदवयवव्युत्पत्त्यनपे
क्षत्वेपि क्रियायोगनिमित्तत्वप्रदर्शनार्थत्वेन व्याख्यातत्वात्। ताघ्येवक्ष्यमाणपुनः सुखग्रहणार्थं संदेहमुमाह। तथाहीति।

राज४

५२

क्रियायोगनिमित्तत्वे क्रियाकर्तृत्वयोर्द्वयोरपि शक्तिकल्पनापक्षे जातिमात्रे शक्तिकल्पनया प्रयोगसंभवे योगनिमित्त
त्वायोगात्तद्भ्रमेण प्रयुज्यत इत्यादिलाघवेन शास्त्रे वक्ष्यमाणा विजातियोगलक्षणनिमित्तद्वयसंभवेऽपि प्रकरणवशाद्यादिशब्दस
मत्विध्याहाराद्वयोगनिमित्तनैवोचितेति युक्तिः। च शब्देन राजशब्दस्य शास्त्रस्थस्य त्रैवर्णिकाधिकारोक्त्यर्थत्वे। न महाविषयत्वलाभः।
सूचितश्चैवमर्थत्वे इत्यादि लाघववक्ष्यमाणयुक्तेः। पश्चादस्य च व्ययमात्रद्योतनार्थं व्याख्यातम्। उत्तराईद्याव षष्ठ्यन्तयेति। नावछुहे
नैवैतावद्युक्तिरिति वदतात्पर्यद्वयं सूचितं। निमित्तेत्यनेन लाघवे वक्ष्यमाणप्रकरणादियुक्तं तत्सूचनार्थं तैर्वं वेति। वकारस्य
व्याख्याता। बार्हस्पत्यादेर्मध्यनिधानस्वर्वकाभिधायकराणस्य राजस्यैवैवनेन ग्रहणं प्रकृतावेष्टिप्रयोगमात्यलिङ्गानंद्यादि
शब्देनोक्तं। यौगिकत्वोक्तेः प्रयोजनमाह तस्मादिति। ननु राजशब्दस्य जातिवाचित्वात्तावे राजयोगनिमित्तराज्यशब्दार्थानव
धारणात्तद्राजशब्दस्य तत्करणनिमित्तता युक्तेत्याशयेन किंतु नरितिलाघवेनाशंक्य जनपदेत्यनेन परस्वहरणे चौर्यशब्द
वज्जनपदस्य पुरस्य च सर्वतो रक्षणे चोरादीनां च जनपदपुरेभ्यो निष्कासने राज्यशब्दस्य [illegible] रूढिरितोक्ता तद्व्याचष्टे तद्वेति।
नामशब्देन सूचितं। यद्वा राजशब्दस्य पालननिमित्तत्वे यद्यर्थ्यादिशब्दवद्रूढित्वानपायात्सर्वपक्षेपि राज्यशब्दस्य राजयोगनि

प्रयोग

रूढित्वं

वा·दि·
१२
13

मित्तत्वोपपन्नेऽथ प्रत्ययसिज्ञायमानावयवार्थवाधायोगात्पालनस्य राजकर्म्मत्वाधिराजनामकत्वात्पालनकारित्वाधितारा
जशब्दस्यावसीयत इति सूचनार्थो नामशब्दः। तायमपि राजशब्दस्य राज्यकरणनिमित्तत्वायोगेऽपि पालनकरणनिमित्त
त्वाद्यौगिकत्वोपपन्नेत्येवमर्थत्वेन व्याख्यातं। आर्यावर्त्तेति ताद्यादसार्वत्रिकत्वाशंकां निवर्त्तयितुं सर्वत्रेत्युक्तं। जनपदश्चेरो
पद्रवकार्योद्धरणं विना तदुत्तरणं सिद्धेस्तदुद्धरणस्य रक्षणेनैव सिद्धत्वादुक्तं। उद्धरणप्रतिबंधकारिविषयतोद्धरणस्य राज्ये
त्यनेनोक्तं। सर्वलोकप्रसिद्धा वार्यावर्त्तविशेषणानर्थक्यमाशंक्य सार्वत्रिकत्वे ग्रंथप्रसिद्धितो यः प्रसिद्धेर्बलीय
स्त्वप्रदर्शनार्थं तार्यावर्त्तेत्यनेनोक्तं। पालने राज्यशब्दप्रयोगमात्रेण राजशब्दस्य तत्करणनिमित्तत्वावगतिश्च कथमित्य
पेक्षायां राज्ञः कर्म्मेति तात्पर्येण राजप्रातिपदिकात्कर्म्मणि ष्यञ्प्रत्ययस्मृतिर्हेतुत्वेनोक्ता। इमेयप्रातिपदिकाद्वापत्ये प्रत्ययस्मृ
तिर्दृष्टांतत्वेनोक्ता। न तस्य विपरीतसाधनत्वेनाधिपतिराजा इति। पालनकारिणि राजशब्दस्य रूढ्या प्रवृत्तत्वाद्राजशब्दादु
गमानपेक्षत्वेऽपि विदितराज्यशब्दार्थानां तद्वशेनाधिराजशब्दार्थज्ञत्वानिःसंभवतीति जातिनिमित्तत्वनिरासाय योक्तेति
परिहरति। राज्ञ इति। पालनकरणनिमित्तापेक्षत्वेऽथ वयवयोगानपेक्षत्वात्त्वात्तद्योक्तिः। यद्यप्यवयवयोगमनपेक्ष्य साधु

२३

तेन २

पालनासाधुनिग्रहकारी राजशब्दस्य वा यत्त्वेन मनुपाणिन्यादिभिरवधारितस्तत्प्रयोगाद्धि प्रतिज्ञातसाधुपालनासाधुनि
ग्रहव्यापारेण तदवश्यं कार्यं तस्य च कर्म राज्यशब्दवाच्यमित्यवधारितं तथा यस्मात्कं जातिर्वाचीयापालने प्रयोगात्पाल
नकारिवाची वा राजशब्द इति संदेहे राजकर्मवाचित्वेन स्मृतस्य राज्यशब्दस्य पालने प्रयोगात्पालनकारित्वनिर्णय
मिद्धेर्युक्तो राजशब्दार्थावधारणाधीनः राज्यशब्दार्थावधारणाद्विपर्ययो राज्यशब्दार्थावधारणाधीनराजशब्दार्थावधा
रणात्मक इत्यर्थः। इदानीं तत्सर्वं श्लोकं व्याचष्टे यथैवेति। जनपदरक्षणमादिशब्दोक्तं दुष्टनिग्रहणं मया कार्यमित्यंगीकरणा
द्योतकत्वराजत्वव्यपदेशस्तेनावश्यं तत्कर्तव्यमिति मन्वादिभिस्तस्य कर्म राज्यमिति च पाणिनिप्रभृतिभिः स्मृतमिति विवेकः॥
छेदनादिसंस्कारैर्धनार्हीकृतं दण्ड्यमानं यथाश्वो निरूप्यते तथा राज्यशब्दवाच्यप्रजापालनकरणांगीकरणात्तदधि
कृतं दण्ड्यमालंब्य राजेत्यर्थः। नन्वेवमपि क्षत्रियस्य प्रजापालनं परमो धर्म इति क्षत्रियस्यैव पालनं स्मृते तस्यैव राजशब्दवाच्य
त्वाद्राजन्यस्यैवाधिकारः स्यादित्याशंक्याह नचेति। शूद्रस्यापि तत्राधिकारः स्यादित्याशंक्याह नचेति। एतदेवाशंकां सर्वमुपपा
दयति नन्वेति। नृपादिवद्राजवद्यालौकिकत्वे सति विहितोपायापेक्षायां नस्य तु प्रजापालनकारित्वरूपस्य प्रत्ययत्वानाव

भवेत्क्षत्रियेप्रयोगासंभवाज्जातिपक्षे च कल्पनानयुक्तेत्याशंक्याह । उक्तं दाति । प्रकर्षसेवनयोग्यत्वकारणस्य दृष्टत्वस्याप्युक्तत्वात्वा ५

वा॰ द्वि॰ १४

न्मात्रस्य च क्षत्तुनापेक्षितत्वाद्विशांदेरविहितराज्यकरणात्तस्य वायेष्वधिकाराविघातस्त्याशयश्च राज्यरहितेपि क्षत्रिये
राजशब्दप्रयोगान्न हि रूढं राज्ययोगनिमित्तत्वानुमानमित्याशंकार्थं नन्विति तात्पर्यं यावदेनन्विति । अधार्मिके राजनि
साधुरक्षणासाधुनिग्रहाभावेप्यैश्वर्यमात्रे राजशब्दप्रयोगाद्रक्षणेन वैश्वर्यमुपलक्ष्यते तन्निमित्तकरादानं दृष्टफल
[illegible]जीवनेनवेत्यनियमसूचनार्थं तन्निमित्तमुक्तं । न तु रक्षणं दृष्टफलजीविषु क्षत्रियेपि प्रयोगाद्यौगिकत्वावगतेः प्रकर्ष
सेवनमकुर्वतीष्वपि क्षत्रियाणीशब्दवन्नधोयत्वमात्रेणानीकस्थलादावुदासीनास्वपि क्षत्रियाणीशब्दो युक्तः । जनपदपुरैश्वर्य
योग्यतायां हेतुभूतायां हस्त्यश्वादिसंपन्नेवीर्यातिशयस्य च क्षत्रियेपि कचिद्दर्शनादितरेष्वपि वर्णेषु चिह्नाभावाद्धि हि तत्व
निमित्तायां क्षत्रियस्यैव योग्यतायां यौगिकत्वपक्षे योग्यत्वप्रतिषेधेपि निमित्तत्वाद्दानवदनिषिद्धसंभवेनिषिद्धाधिकार
विशेषणायोगाद्विहितस्यैव राज्ययोग्यत्वस्याधिकारविशेषणत्वोपपत्तेर्ब्राह्मणादिष्वप्रयोगाद्योग्यत्वनिमित्तराजश
ब्दप्रयोगानुपपत्तेर्जातिनिमित्तत्वस्यावश्याभ्युपगमनीयत्वात् । एकदेशेपि यः शब्दो दृष्टो जातिनिमित्तकः । तद्व्यागा
न्तव्याप्तिनिमित्तान्तरकल्पनेति च वार्हि राज्याधिकरणवार्त्तिकोक्तन्यायेन राज्यरहितेक्षत्रियेजातिनिमित्तत्वेनाभ्यु

१४

14

स्थ ४

पगतस्य राजशब्दस्य राज्ययोगित्वस्यापि क्षत्रियेजात्युत्त्यागादक्षत्रियेपि क्षत्रियकार्य्योपपत्त्या प्रयोगोपपत्तेरजहत्स्वार्थवृत्तित्वेन
जात्युत्त्यागसंभवात्तत्रानेकशक्त्यापादकं निमित्तांतरं कल्पनीयमित्याशयः क्षत्रियस्य प्रजापालनं कार्य्यमित्यजानानामपि
शूद्रादीनां ब्राह्मणादिषु राजशब्दप्रयोगात्कार्य्योपपत्तिहेतुकत्वात् उपपत्तेरश्वकर्णादिवद्रूढिज्ञातिवापि वैकल्पिके यौगिकत्वेतत्य
वश्याभ्युपगमनीयत्वाद्राजसूययवाक्यस्थस्य राजशब्दस्य द्विधापि संभवात्संदेहे सति प्रकरणादिसत्वे यौगिकत्वं निश्चीयत इ
ति परिहारार्थं न क्षत्रमित्यादिना ग्रंथेनाचष्टे ॥२४॥ पुनरिति । यदि शब्दसमभिव्याहाराद्वेत्यनेन यौगिकत्वस्योक्तत्वं दर्शयतीति
वदता राजशब्दस्य यौगिकत्वनिश्चयाद्राजसूयांतर्गतस्यैवावेष्टिप्रयोगस्य ब्राह्मणादौ निमित्ते बार्हस्पत्यादिमध्ये निधानस्य
कालनिर्धारणलक्षणगुणविधानमित्यध्याहारेण व्याख्या स्थिता । राजशब्दस्य यौगिकत्वे ब्राह्मणादेर्लिप्स्य प्राप्तत्वेना
विधेयत्वादवेष्टिकवाक्यार्थं न ब्राह्मणस्येति लाघवं ब्राह्मणादेः कर्तृसंख्यावाचा ख्यातसामानाधिकरण्यात् कर्तृत्वा
वगतेः कर्तृश्च कर्मस्वरूपानंगत्वेन तदवेष्टिकवाद्युक्तमाशंक्य हेयाध्याचष्टे न कर्म्मांतरमिति । व्यवहितान्वय हेतुहेतुमद्भि
स्यन्तयोराख्यातद्वयैकवाक्यत्वावगमादेकेन च वाक्येन ब्राह्मणादिनिर्धारणलक्षणानेकगुणविधाशंकेर निर्धारणस्य च ह

वा॰
१५

विः संस्कारत्वेन कर्मस्वरूपं गत्वा कर्तुरपि च ब्राह्मणादेः प्रयोगद्वारा कर्माङ्गत्वोपपत्तेर्विधेयत्वेनैकगुणोपादानाव
मर्शान्तरापत्तेर्विधानेतदनापत्तेश्च [illegible] युक्तेति द्वितीयव्याख्याशयः ॥ हेतौ हेतुमति च लिङ् इति प्रकारद्वयमभि
प्रेत्य वृद्धवचनं । यौगिकत्वमात्रात्सफपगमेऽपि तत्क्षत्रियस्याश्रयेण वीर्यातिशयात्प्रजापालनविधानाद्वा पालयत्यपि तत्क्षत्रिय
जातीयत्वेन योगरूढ्याद्राजशब्दप्रयोगोपपत्तेः सार्वलौकिकेनार्य्यप्रयोगेण सार्वलौकिकत्वेन च प्रयोगबाधाद्यौगिकत्वेव
युक्तेति परिहारान्तरार्थमथ वेत्यादिना प्यमनेकशक्तिकल्पनादोषापत्तेः सर्वपरितोषेण त्वेवं व्याचष्टे [illegible]न्तावदिति । अप्रा
माणमेव प्रमाणीकृत्येति च्विप्रत्ययार्थेनापरितोषः सूचितः । अपि वेति सा[illegible] यौगिकप्रयोगस्य सार्वलौकिकत्वे नैव विप्रगीत
त्वाज्ज्ञातिप्रयोगस्य वा सार्वलौकिकत्वेनैव विप्रगीतत्वात्पुनरुक्तमाशंक्य प्रामाण्याप्रामाण्यरूपविशेषसिद्ध्यै प्राक्सार्व
लौकिकातोऽस्याप्रामाण्याप्रामाण्यविशेषमभ्युपेत्य विश्वसनीयाविश्वसनीयरूपविशेषसिद्ध्यै सैवोच्यत इत्येवं ता
वत्परिहरति । अपि वेति उत्पत्त्योर्विश्वासोऽस्य संजात इति तदस्य संजातं तारकादिभ्य इतजिति संज्ञातार्थस्मृतेरित्तच्प्रत्यये तेन
प्रत्यायितशब्देन विश्वसनीयत्वोक्तेः सूतीयया च निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति कारयितृरूपप्रयोजनवाचिका

१५

सार्वलौकिक ३

रणशब्दोपपदकल्पनयाप्रयोजनत्वोक्तेर्विश्वसनीयाविश्वसनीयत्वप्रयोजनतोक्ताशब्देदासुनरूपष्यन्नवोक्तपउपपत्ति
माशंक्याहनहीतियद्वायौगिकप्रसिद्धिर्नैवदेशेप्यप्रसिद्धातिप्रसिद्धिर्महामार्यदेशेप्यस्तीतिशाउक्तेरदानीन्ने ह्यानयौगिकप्रयो
गप्रामाण्येविप्रतिपद्यंतेआर्थाक्तातस्माद्धत्वरातिर्ज्ञानन्नपिरराजासन्नितिक्षत्रियेथत्वराताववराजशब्दप्रयोगदर्शनाज्ञा
तिप्रयोगप्रामाण्येविप्रतिपद्यंतेऽतस्तच्छ्याथापोनरुक्त्यंपरिहरतियद्वेतितथेतिसाध्यंव्याचष्टेतथेति।ननुयौगिकत्वेपिक्षत्रियस्य
विहितराज्ययोगनिमित्तत्वसंभवेप्याद्ये धान्नुष्ठितराज्ययोगनिमित्तत्वा [illegible] योगाद्ब्राह्मण
प्रशक्षिरित्याशंक्याउब्राह्मणादौराजशब्दप्रयोगस्यक्षत्रियस्यराज्ययोगनिमित्तत्वानुपपत्तेर्न्नीतिष्ठतीतिसूचनार्थंतस्मादि
तिसूर्वपक्षोपसंहारस्ताध्यंव्याचष्टेतस्मादिति।अपिवानिःसंदिग्धंजगत्सामाकर्म्मांतरमितिसूर्वाधिकरण [illegible] सूर्वपक्षसाध्यसूसि
तंसुक्त्वांतरमाहअपिवेति।कर्म्मांतेदसूत्रनायाविष्टिशब्देनब्राह्मणादिवाक्यमुदाहरणत्वेनोक्ताब्राह्मणादिगुणरूपकर्तृशब्द
वाच्यप्रयोगार्थमुच्चार्यन्नतक्षत्रियस्यैवैकस्यराजसूययज्ञसंयोगादितिसूर्वाधिकरणसूर्वपक्षसूत्रस्ययुगणशब्दसिद्धांतसूत्रस्यैवम
शब्दयोरनुषंगेणसूत्रव्याख्याख्यार्थसाध्यंव्याचष्टेएवमिति।यौगिकत्वाभ्युपगमेकनिच्छन्नपितन्निराजिधविषयत्वमितिदिवज्ञतिदीच्य

वा॰
१६

16

17

थाद्राजतेर्द्दीप्तौ रौणादिके कनिन्प्रत्यये कृते ककारेकारनकारलोपान्नकारान्तराजशब्दः कृतस्त्येर्द्दीव्यर्थाउसाराद्धरं दी
प्तियोगनिमित्तनाम्नुपगतं युक्ता राज्ययोगनिमित्ततान्नवयवार्थाउसारात्तावादस्र्वशक्तिकल्पनेवसंबंधिनावक्त्रा
संबंधोन्कयराको विशिष्टेक्तावपि विशेषणविशेष्यान्क्यापत्तेरनेकशक्तिकल्पनापरिहारार्थं जातावेव शक्तिकल्पनस्यैव न्या
य्यत्वादनाशंक्येतिस्ववयितं यौगिकत्वविकल्पानिरस्यतित्वविये ति। स्थात्त्वेणपालयितव्यस्य राजशब्दप्रवृत्तिहेतुत्वे मंडले
श्वरे राजशब्दो न युज्यते त्याशंका सर्वमाहतत्वेति तत्त्वविषयजातिरहिते पि ब्राह्मणादावत्तिपिक्षे राजशब्दप्रयोगाद्धरिराज्या
दिव्यायाउत्पत्तेर्नाभिषेकास्य संस्कारनिमित्तत्वमाशंकते तेनन्तहीति [illegible]जानमभिषेचयेदिति राजशब्देन राजशब्दवाच्य
तयाप्रसिद्धस्यत्वविषयस्यैवाभिषेकविधानाद्दिधिवेलायामेव राजशब्दसंयोगाद्राजशब्दार्थस्योद्देश्यत्वेन प्राक्प्रसिद्ध्यपे
क्षत्वात्सेद्धप्रसिद्धेरथादरणीयतया जातिवाचित्वावगतेरभिषेकनिमित्तत्वं न संभवतीति परिहरति नैवमिति। राजशब्देन
भिषेकः क्षत्रियस्यैव विधीयते सहैवचराजशब्देनाद्धर्थस्यादिशब्दात्याग्रिवोपनयनादिराजशब्दात्प्रायेन ब्राह्मणा रिश
ब्दबन्नात्तपनयनवद्राजशब्दप्रबद्धावभिषेको निमित्तं स्यादिति कश्चासौ राजशब्दो नाक्षत्रिये धर्मशास्त्रकाराणामस्ति

१६
२७

न२

स्य

मतइत्यर्थःसत्यम्निषेकनिमित्तत्वेष्टत्वेनसिद्धराजशब्दप्रवृत्तेःस्वरूपेणनिमित्तत्वायोगात्संस्कारद्वारानिमित्तत्वस्याभ्युपगंत
व्यत्वात्तस्यचविहितक्रियाजन्यत्वाददृष्टविशेषस्यनिषेकस्यनिमित्तत्वात्तस्यवापिशब्देनसूचितत्वात्श्लोकंव्याचष्टेततइति।येनैवकार
णेनविधिवेलायामेवराजशब्देनाभिषेकःसंयुज्यतेतेनकारणेनाभिषेकात्प्राक्प्रयोगेणसमुदायस्याभिचारादस्तुयजनवरण
समुदायनिमित्तत्वविक्रयस्वत्वजात्यभिषेकनिमित्ततायुक्तेतितेनैवचेत्यनेनप्रसंगाद्रुक्तायदिहीत्यादिनाप्रत्येकस्याभिचार
त्वादपिनसमुदायत्वाविनेतिव्यतिरेकमुखेनवक्तुंनतुकेवलायांजातावित्येवकारार्थेनजातिव्यभिचारंनिरस्याभिषेकस्याभि
चारनिरासार्थंजात्यंतरेचेत्युक्तं।जात्यंतरेयद्यभिषेकोविधीयतेयद्यभिषेकोराजुभिन्नीयतेशब्दस्तुनप्रयुज्यतेत्यध्याहारेणयोज्य
नृपादिविषयेनचेत्यनेनोक्तेयथावेदशब्दस्यवेदादौमंत्रब्राह्मणसमूहोनिमित्तत्वेनवेदिंसंमार्ष्टीत्यादौववत्सजात्वाद्याकार
दर्भमुष्टिबंधनसंस्कारस्तथाराजशब्दस्यक्वचिज्जातिःक्वचित्संस्कारोनिमित्तंनविरुध्यतीत्याशंक्यनचैकस्मिन्नित्युक्तं।अभिषे
कनिमित्तत्वेपिचेत्यादिनाअभिषेकोपीत्यपिशब्दसूचितार्थोव्याख्यातः।शब्दार्थसंबंधनित्यत्वसिद्ध्यर्थंवनित्यस्यैवशब्दप्रवृत्ति
निमित्तस्यापेक्षणादभिषेकस्यचवस्तुतोनित्यत्वाभावेनविहितत्वरूपेणैवनित्यत्वस्याभ्युपगंतव्यत्वाददृष्टविशेषस्यवाविहित

वान्निमित्तत्वं न संभवतीत्याह अपि वेति। श्लोकं व्याचष्टे नित्यस्य हीति। एवं चाभिषेकस्यापि निमित्तत्वे विहितस्यैव निमित्तत्वान्नि
त्रियजातावेव विहितत्वाज्जात्यधिकारोपपत्तेर्जातिस्थत्वेन निमित्तोपलक्षणमापद्यत इत्युक्तेऽस्मान्न हि क्षत्रियस्थत्वोप
लक्षितस्याभिषेकस्यैव निमित्तत्वेत्याशंक्य तत्रस्थत्वमुक्तं। साक्षान्निमित्तत्वसंभवे निमित्तत्वोपलक्षणत्वस्यान्याय्यत्वादित्याशयः
रात्प्रयोगान्निमित्तत्वे दृष्टे तं न्यायमतिदिशति एतेनेति। न चाभिषेकस्यादृष्टार्थत्वेन विधिविषयत्वादनेन रूपेण नित्यस्य क्षत्रियस्थ
स्य निमित्तत्वसंभवे वर्णान्तरेण स्पृष्टत्वात्तस्यानित्यस्य निमित्तत्वायोगान्नित्यस्य च जात्यधिकारो जातेर्निमित्तत्वे संभवति न
च निमित्तत्वं युक्तं राज्ये वैश्वर्यात्मके लिप्सये वस्पष्टत्वेऽविधिविषयत्वादात्तत्वान्नित्यत्वात्तदुपपत्तेरनित्यस्यैवागत्या चौरशब्दप्रवृत्तौ
स्तेयस्यैव राजशब्दप्रवृत्तौ राज्यस्य निमित्तत्वं न विरुध्यतीत्याशंक्याह तदपीति। ऐश्वर्यं लिप्सा ततः प्रवृत्तिसंभवेऽपि पालनेऽपि विधि
विना प्रवृत्त्ययोगात् चौरतस्कर इति महाभाष्यकारादिभिः। पीड्यमानाः प्रजा रक्षितुं कायस्थेभ्यश्च विशेषत इत्यादिविधिदर्शना
द्राज्यस्यापि विधिविषयतास्तीत्याशयः। विधानाधीनत्वलक्षणार्थः प्रवृत्तिशब्दः। अन्वयव्यतिरेकाभ्यामपि जातित्वाविनै
वावसीयत इत्याह दृष्टश्चेति। अभिषिक्तेऽन्यजातीये प्रयोगस्याभ्युपगमं दर्शयति हितेजनपदिनः प्रयोक्तारः मार्वतौ मे प्रयोग

१८

मित्यत्रान्ध्रद्रविडादिविरस्तप्रसंगतत्वेनोक्तत्वादायुक्तविषयानस्तित्वानोक्तिः। एतदेवोपसंहरति। तस्मादपीति। जातिवाचिनश्च
राजन्यशब्दस्य राज्ञोपत्यमिति राजशब्दप्रकृतिकत्वाख्यथा उपपद्या राजशब्दस्य जातिवाचितावसीयत इत्याह। तथा चेति। अ
न्यथा उपपत्तिं प्रश्नपूर्वं उपपादयति। कुत इति। सर्व एव वर्णाः क्षेत्रराजानस्तेतापत्यापत्यवद्योगे राजन्यशब्देनाख्यायते क्ष
त्रियजाती एव नियत इतीदृशं वैषम्यं कथं परिह्रियेतेत्यध्याहारेणयोज्यं। न तु राजशब्दस्य जातिवाचित्वे क्षत्रियापत्यव
विना क्षत्रियजातीयत्वायोगाद्राजप्रातिपदिकमात्रेण क्षत्रियापत्यत्वसिद्धेरपत्यवाचीयत्प्रत्ययोनर्थकः स्याद्यौगिकत्वे तु
क्षत्रियोयं राज्यकारिणोपत्यमित्यस्यार्थस्य प्रातिपदिकमात्रेणासिद्धेरर्थवत्वानिति राजशब्दप्रकृतिकत्वाख्यानस्य वि
परीतसाधनत्वमाशंकते। नन्विति। प्रकृतौ चितत्यपत्ये वैकजातीयत्वेन जातीयत्वेन जातिशब्दस्य तुल्यत्वाद्राज्ञापत्यमपि
राजशब्देनाभिधीयतां न राजन्यशब्देनेत्यर्थः। दृष्टांतस्पष्टीकथा चष्टे यथैवेति। अत्र व्याख्यानप्रकारमात्रमिदं न तु राजन्यप्राति
पदिके परमार्थतः प्रकृतिप्रत्ययविभागोपत्यवाचिताप्यस्तीति परिहरति। नैष इति। न तु परमार्थतो राजशब्दस्य राजन्यशब्दप्र
कृतित्वाभावे कथं जातिवाचित्वकल्पनेत्याशंक्याह। सत्यमिति। तत्र स्यापत्यं क्षत्रिय इति जातिवाचित्त्वक्षत्रियशब्दप्रकृतित्वेनावा

वा.
२९

ख्यानोपायमात्रतयाप्युक्तेन तत्रचशब्दस्यजातिवाचित्वकल्पनावद्राजशब्दस्यजातिवाचित्वकल्पनायुक्तेत्याशयः।ननुरा
जश्वशुराद्यदितिराजशब्दाद्व्याख्यानसूत्रेकात्यायनेनराजन्यकार्थप्रत्ययमाचेष्टसमर्थ्यराजन्यशब्दस्यपरिसंख्यानेनजाति
विषयत्वेनियमोक्तेःक्षत्रियगतराजापत्यत्ववाचित्वावसायाज्जातिवाचित्वासावेपिपंकजादिशब्दवज्जातौरूढत्वोपपत्तेन्न
तदन्यथानुपपत्त्याराजशब्दस्यजातिवाचित्वकल्पनायुक्तेत्याशंक्यतेनन्वेवेति।जातिग्रहणमित्यत्रक्षत्रियत्वविशेषणानुपा
दानादधिकारतोमनुष्यजातिमात्रावगमाद्राजशब्दस्यमनुष्यमात्रगतराजापत्यत्ववाचित्वापत्तेःक्षत्रियत्वजातिविशेषणं
विनापिसिद्धेर्जातिग्रहणवार्त्तिकानर्थक्यापत्तिरित्याशयेनपरिहरतिननुदिति।कथंमनुष्यजातिमात्रस्याधिकारइत्यपे
क्षायांवृत्तौराजशब्दस्यराज्यकारिमनुष्यमात्रवाचित्वादितिराजशब्दस्यार्थंतेनसूचितं।स्यादेतत्नेनतत्रजातिग्रहणवार्त्तिक
ानर्थक्यंस्यादित्यध्याहारःसूचितः।ननुराजासर्वस्येष्टेब्राह्मणवर्जमित्यादौइत्याध्ययनंदानमित्यादौचराजराजन्यशब्दा
भ्यांस्मृतिकारैर्योराजाविजितीस्याद्यजमानमाख्यापयेनैवेतत्रो [illegible] नःशेपमाख्यानमित्यादौराजन्योमा
वास्यायांपौर्णमास्यांवाग्निहोत्रंजुहुयादित्यादौचकल्पसूत्रकारैःकर्मभेदोपदेशान्नतयोःपर्यायत्वंसंभवतीत्याशंक्यते

शयेनाथ

२९

19

नन्वेवेति। ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेदित्यादौ जातिवाचिनोपि ब्राह्मणशब्दस्य परिव्राजकब्राह्मणविशेषगामि
त्वात्सङ्ग्याद्ब्राह्मणस्सोमेनेत्याद्याश्रमांतरस्थब्राह्मणविहितश्रवणादिकर्मणः कर्मांतरोपदेशो यथा न विरुध्यते तथा
राजशब्दस्यापि राजन्यविशेषगामित्वात्कर्मभेदोपदेशे न राजराजन्ययोः शब्दयोर्भेदप्रसिद्धिर्विरुद्धेति परिहरति। सत्यमिति।
कथं सामान्यशब्दत्वे विशेषगामित्वमित्याशंक्य सामर्थ्यादित्युक्तं। राजन्यानामुद्दिश्योपदिश्यन्न राजानं हन्यादिति निषेधस्य राजा स
निर्वापालंबनात्मकश्च संस्कारो गुणविधिरिति अधिकरणविषयश्च तालंबनं निर्वापविशेषापेक्षायां तदवधारणार्थमिदं नाम
करणशब्दं व्याचष्टे करवेति। यद्वा अत्र नारव्याधीतवेनायनवैलक्षण्योक्तं कथं निर्वापालंबनं संस्कृत्यो गुणार्थं तत्याशंका निरा
सार्थं प्रकरणशब्दं इत्यर्थं व्याचष्टे अथवेति। यद्यपि प्रकरणेश्रूयतश्चैतावता कारणेनालंबनो निर्वापालंबनात्यो गु
[illegible] श्चायनवैलक्षण्येनयुक्तस्तथापि निर्वापालंबनात्तेयनकर्मणा विधायकस्य गुणसंबंधितवेनानवरोधाद्गुण
र्थेवालंबनं निर्वापश्रुतिरित्यर्थः। यथा सिद्धशकटेघातं तेप्राप्तेकथं ध्वंसा उद्धानमित्याशंक्य सिद्धायात्रापीषायाश्चूर्णी
दिनाश्चेती करणं शक्यमित्याह दर्शेति। निर्वापे कथमोदनाख्यद्रव्यरो त्रिविशद्वित्याशंक्य स्थालीवचनेना रुशब्दं मंगीकृत्य
सुरव्यत्वाद्भूतिष्वत्र प्रातिपदिकाभ्युपगमेन द्वितीयासमर्थ्यर्थे कल्प्यापं चशरावमोदनं निर्वपेदित्यादौवा शरावादिशब्दस्य
तत्परिमिते प्रयोगदर्शनाच्चरुशब्दस्यापि तत्परिमितलक्षणार्थत्वोपपत्तेर्यथा चरुपरिमितान्नीह्योलवंतितथा चत्वारो मु
ष्ट्यश्च कार्या इत्यर्थाभ्युपगमाद्ब्रीह्याभिशिष्टचतुर्मुष्टिपरिमाणविरोधोपपत्तेः परिमितलक्षणार्थतया चरुश्रुत्यर्थस्यापि
थ्री वाक्यान्वयेनात्यंताबाधात्समर्थ्यर्थे कल्पनायां द्वितीयार्थात्यतवाधापत्तेश्च प्रातिपदिकमेव लक्षणया चाख्येयमिति द्वे

वा॰
३८

धापरिहरति निर्वपश्चेति । प्रासेकर्म्मण्यनेकार्थविधौ वाक्यभेदापत्तेः फलदेवतापदानन्वयमाशंक्याह स्तनीति । ओष
धिवनस्पतयोऽन्नं प्राणभृतोऽन्नादमिति प्राणभृत्त्वं तावनस्पतीन्नुतिलोक्त्वं वक्ष्यते लौकिकरूपदेवतान्वावगमात् प्राणभृत्त्वस्य
वायोर्देवतात्वमुपचर्य वनस्पतीनां वायुदेवत्यत्वान्नत्वं लवत्वेन पायावायुदेवत्यत्वात् उवाद दृष्ट्यर्थं [illegible] वायुगुणस्पर्श
वत्त्वाद्वा वनस्पतीनां वायुदेवत्यता लिंगेन । सर्वपदत्वमुपसंहरति तस्मादिति ॥ ॥ यावदुक्तं वा कर्म्मणः श्रुतिमूलत्वात् ॥
यावदुक्तशब्देन श्रुत्यनपेक्षत्वोक्तेः प्राकृतालंबननिर्वापविषयगुणविधित्वनिरासार्थतया नवेति लाघवेन स्वरूपव्याख्या
योऽनुराईव्याख्यानार्थं यदीत्यादिवाक्यशेषं तेनैव तात्पर्यतो व्यावष्टे यदिहीति । यद्यालंबननिर्वापाविति यदिशब्दं हेत्वर्थं मन्ये
त्ययस्मादालंबननिर्वापौ विधीयेते न तु प्राकृतौ नाहि श्रुविहितावितिलाघवाय चेन कर्म्मणः श्रुतिमूलत्वादिति सूत्रावयव
व्याख्याऽन्यगुणसंबन्धित्वाद्विधेः कर्म्मविषयतानवक्ते त्याशंक्योत्तरं गतः समानपदोपादानेनालंबननिर्वापयोर्विधेयत्वाव
गमाद्यादितौ प्रत्यभिज्ञानाद्विधेयत्वं न सहेते तेन तौ यावालंबननिर्वापौ कर्त्तव्यावित्येव प्राकृतौ लभ्येते तत्र प्राप्तौ लक्षयित्वा
नश्रुतस्य गुणो विधातव्यो लवनिष्प्रत्यभिज्ञानालावात्वन्तौ विधेयावेवेत्यध्याहारेण यदिन विधीयेते इत्यादिना व्याख्येय

३६

३८

मित्याशयः ॥ धासे कर्म्मणि गुणफलरूपानेकार्थविधौ वाक्यभेदापत्तेरपि गुणविधितानयुक्तोत्पत्तिवाक्यार्थतो चे
त्यादि सिद्धे तेत्यंतं साध्यमुत्तरसूत्रस्य फलशब्दस्य वितार्थप्रतिपादकं व्याख्यातुमाह वायव्येति । तेन विनापि वाक्यभेदा
पपत्तिरूपेत्याह हेतुः । कर्म्मांतरत्वे तु वाक्यभेदो नास्तीति व्यतिरेकमाह गुणेति । आग्नेयात्यादि सामान्ये वैदिकत्वसामान्येन बुद्धिस्थ
त्वस्य वैदिकानंतरनिर्वापानुवादहेतुतया सर्वपत्नीपरत्वेन विधाय कथ्यतस्तत्र गणार्थतया निष्टत्वादापाद्यो नार्थमिति सूत्रस्य वि
तुतुपेत्यतावद्व्याख्यातेर्थे सूत्रेोत्तरार्द्धं योजयति । तेनेति । यावदुक्तमिति लाघवेनैतद्देवसूत्रमाहूतोत्तरविचारः सर्वपत्नीयो
जितं तदनुसंधेयं । अग्नेरिति । ननु फलार्थत्वेनेह प्रधानकर्मणो विधेयत्वावसायान्निर्वापालंतयोप्यसंस्कारत्वप्रसिद्धेः प्राधान्य
योगात्प्राधान्यसिद्ध्यर्थं विधेयाग्निप्रथमश्रवसानं न विध्यतीत्याशंक्याह नवेति । अनेन वोत्तरसूत्रस्य च फलशब्दस्य संस्का
रत्वनिरासार्थतापि सूचिता । ननु प्राधान्यस्य यज्यर्थात्कल्पकत्वेपि वायव्यादिशब्दोक्तस्य देवतात्वस्य यागं विनानुपपत्ते
स्तत्कल्पकत्वं न विध्यतीत्याशंक्याह वायव्यादीति । आलंभस्य स्पर्शवद्दृष्टविषयत्वात्सर्वेषामालब्धव्यानां स्पर्शगुणत्वादु
देवत्यत्वासंवित्तुः प्रसवेनिर्वपामीति च मंत्रलिंगात्सर्वेषां निर्वाप्यद्रव्याणां सवितारद्व्यस्य सवितृदेवत्यतावत्कुशकार्यत्वात्पाशयः ॥

एवंत्वग्नीषोमीयंपशुमालभेतेत्यादावपिवायव्यत्वाद्युपपत्तेऽसमारब्धंतंवक्तुंनिर्वपेदित्यादौचसौर्य्यत्वाद्युपपत्तेऽसमारब्धत्वादग्नीषो
मीयत्वाद्युत्वादायोगेनाव्यापकत्व ऽसङ्करपरितोषाकेनविद्यजमानेनवायवेसंकल्पितंश्वेतछागलंऽस्यवायव्यत्वसं
कल्पितत्वाच्चरोर्निर्वापऽफलार्थविधौयतऽत्पत्त्यथापरिहरति अथवेति। आग्नेयस्तुपाकृरोतीत्यादीनामपियजिवाद्य
कर्म्मवाचितानैवघृतत्वाद्येतिसूचनायालंनादितिरितिवऊवचनं। नतु देवतात्वंयथ्यापिष्वेत्यादिवाद्विधेयत्वपरिग्रहेतिगौ
रवंस्यादित्याशंक्याह विशिष्टेति। परकीय इत्यस्य कृतौचविनियुक्तस्याथ्र्यार्थेकर्म्माणिविनियोगानौचित्येनात्राप्यपरि
तोषाद्वास्यद्देशेनश्वेतादेर्त्यावदर्थमालंभनादिकार्यमितिसर्वपाक्षिणोऽलिमतंपरिहारमाह अथवेति। नतु यागंविनातद्धि
तोद्देशंदेवतात्वंनसिद्ध्येदित्याशंक्याह नावश्यमिति। यागंविनादेवतात्वानुपपत्तेरेतदधिकरणघृतत्वाद्यवाद्देश्यत्वमात्रेण
देवतात्वमनंतरऽसर्वपूर्वीमतत्रइत्याशयऽ एतदेवोपसंहरति तस्मादिति। यजमानान्तरसंकल्पितत्वाहत्यर्थेयकिंचिद
त्युक्तं। इतिवाक्यार्थोयावदुक्तचोदनानुसाराद्वसीयतइत्यध्याहारेणेतिकरणीयोज्यऽ। उपेत्विति तंलाघंसर्वपक्षेनांयाथ्यसं
गतिऽसर्वथाव्याख्यातुमवतारयति गुणेति। फलपदत्यामोऽहुणेगाम्भुपगफलरूपानेकार्थान्वयविधिलक्षणवाक्यभेदात

वेपिसन्नाडइत्वरितस्याविधायकत्वाविध्युत्ववादवैरूप्यलक्षणवाक्यभेदापत्तिरपिशब्देनश्चिता। नन्वनारभ्यवाद
नांप्रकृत्यर्थत्वस्य स्वतंत्रीयेवक्ष्यमाणत्वाद्विहितत्वोपलक्षणंविनापिप्रकृत्यर्थत्वसिद्धेर्विधायकत्वोपलक्षणेत्वेव
वादविधायकत्वोक्तिरयुक्तेत्याशंक्याह नद्येति। यदि तु यज्ञालंबनःकार्य्यश्चसश्वेत। विशिष्टःकार्य्यइत्युपलक्षणार्थत्व
विधानार्थत्वंवैरूप्यते ततोवैरूप्यस्यादित्यभिधानार्थमयेति। तात्पर्यंस्यात्वेष्टनही तियावतोश्वान्वतिरूक्ष्णीयात्वावतोवारूपेण
श्वतुकपालान्निर्वपेदित्यत्रप्रतिरूक्षीयादित्यस्यविहितदानलक्षणार्थत्वंनिर्वपेदित्यस्ययागविध्यर्थत्वंतेदोपादानाद्युक्त
मितिवैलक्षण्यसूचनार्थमिथः। शब्दस्यारव्यानार्थंसमृद्धित्वकार्थ्यप्रधात्वर्थइतितात्पर्येणधात्वर्थमात्रानुवादेवैवैदिकत्वसामान्ये
ननुक्तिस्यत्वाद्विहितविषयत्वावगमेसत्यनारभ्यवादत्वात्प्रकृत्यर्थत्वसिद्धिरित्याशंक्यतथेत्यनेनयदाहवनीयेजुहोतीत्यत्रहो
मस्यद्रव्यदेवतसाध्यत्वादेवतात्वयस्यावालौकिकत्वेनविध्येकगम्यत्वादृष्टदेवतयोस्तुहोमानुपदेशात्प्रकृतिविशेषानवगतेश्च
तिदेशतोप्यलाभादरूपत्वेनविधातुमशक्यत्वाद्धत्वाद्यावगतेरदृष्टार्थत्वेनचालौकिकत्वाद्धूरस्यवैदिकहोमानुवादो
युक्तः। श्यालंबनसन्तुलोकवेदसाधारण्याल्लौकिकेपिचलोजनादौवैदिकप्राशुरस्वत्वादिनियमदर्शनात्सामान्यप्रकृत्याव

वा·
५०

लेनमात्रस्य बुद्धिस्थस्य वैदिकत्वमात्रेणाख्यातत्वमुपपद्यते वैदिकविषयत्वानवगमात्तद्दर्शनेन कृत्यर्थत्वासिद्धिरिति प
रिहृतं तद्व्याख्यानं केवलेति। आनर्थक्यपरिहारार्थं लौकिकस्यापि निर्देशविषयतेत्याशंकानिरासार्थं त्वेन प्रत्ययार्थ इति लाक्ष
णिकप्रत्ययार्थानुवादपक्ष एव प्राकृतालंकारानुवादो लक्ष्यते नाप्यर्थ इत्येवमवधारणे केन व्याख्यातमाह नवेति। अत एवोपसंहा
रश्लोकार्थं व्याचष्टे तस्मादिति। यजतिकर्तृद्रव्यफलभोक्तृसंयोगादेतेषां कर्मसंबंधात्। यावदुक्तं शब्दस्याप्युपपन्नं निरासार्थं त्वा
न्नैव प्रासेककर्मणि गुणफलाद्यविधौ वाक्यभेदः सूचनार्थं संस्कारत्वनिरासस्य सूचनार्थं च फलपदे फलसंयोगाच्चेत्येवं सं
योक्तद्ध्येपि द्रव्यदेवतयोर्यागकर्मणि समतिसंबंधोपपन्ने फलस्य च कर्मातिरेकेऽपि नतु तेषु तिसंबंधोपपन्ने स्याग्गोयमपूर्वः
प्रधानत्वतो विधीयते न तु प्रकृते कर्मणि संस्कारके गुणविधिरित्यर्थः। यद्यल्लघुनाश्च नेणोक्तिसंगतवेश्च गौरवस्याना
यणीयत्वादिहस्य फलपदप्रयुक्तं। फलसंयोगमात्रेण वाक्यभेदानापन्ने द्रव्यफलसंयोगस्य वाक्यभेदहेतुत्वस्य सूचनार्थं
मध्ये फलपदप्रयोगः। शक्तादेर्देवतासंयोगेपि यागकल्पना द्रव्यस्येव देवतासंयोगो यागकल्पको नास्येति सूचनार्थं
फलशब्दस्य व्यवहितस्यापि द्रव्यशब्दस्य लोकशब्दान्वयो विवक्षितः। देवतायाश्चैवोक्तत्वालाभेपि कृतिभाक्फलत्वेनस्य देवता

५०

द्रव्ययागाकल्पकत्वान्न ह्याहस्त्यात्यज्यमानहविरुद्देशपर्वात्मकहविस्त्यागो लक्षणया देवता । द्रव्ययागकल्पकत्वं ह्यवना
र्थलोकशब्दः । अथ तथाध्ययनताद्दृश्येति । तात्पर्येण द्रव्यलोकसंयोगं व्याख्यार्थफलसंयोगव्याख्यार्थं श्रुतौ युक्तं तन्नैवेति । तात्पर्ये
णानागतावेक्षणेन प्रागेव व्याख्यातत्वात्तु न रूक्तमाशंक्य दृष्टांतं तथा व्याचष्टे यथेति । समानपदोपात्तत्वाल्लंलत्यागेन पदां
तरोपात्तद्रव्यदेवतान्वयविधानं न युक्तमित्याशयेन कथमिति । तात्पर्येण दृष्टा नहीत्यादिना प्रमादस्य [illegible] इति मध्ये तत्त्वं ते
न द्रव्यदेवतान्वयविधानं तु [illegible] कथमिति [illegible] विधिरूपपादितस्तत्तात्पर्यतो व्याचष्टे विधिस्त्वादिति । नत्विति । ता
त्पर्येण द्रव्यदेवतान्वयविधावपि धात्वर्थान्वयस्यापि प्रतीतस्य त्यागायोगाद्विधेयत्वावश्यंभावेन वाक्यभेदमाशंक्य न द्रव्य
देवतायाधात्वर्थेन यावयो विधेयो येन वाक्यभेदः स्यात् किंतु तावदेव द्रव्यदेवतायां धात्वर्थेन च विशिष्टा विधेया नत्वा स्व
कृत्याधात्वर्थविशिष्टत्वावगतेः पदांतरसमभिव्याहाराद्द्रव्यदेवतासंबंधविषयत्वावगतेरनेककारकान्वयसहत्वाच्च सं
बंधस्येति संबंधशब्देनोक्तायास्तावता यावैशिष्ट्यं विनात्तु शक्यत्वायोगाद्विशिष्टाया एवस्वरूपदस्य तिपाद्यत्वेनैकपदमात्रेणनै
राकांक्ष्यायोगाद्वाक्यभेदानापत्तिरित्यभिधानार्थं नेतीत्याद्युपपन्नमेकं वाक्यमित्यंतेन तात्पर्यमुपेक्ष्यैतेषामिति स्वरूपावयव्या

ख्यानार्थं न चेति। सार्धं व्याचष्टे स चेति। त्यागं विना तूद्देशमात्रेण देवतान्वयोपपत्तेर्नान्यथानुपपत्त्या यागकल्पनेत्याशंकां
नावश्यमिति पूर्वपक्षवार्त्तिकोक्तां परिहरति नहीति। ब्राह्मणोद्देशेन पक्वे यत्त्रे तदुद्देशेन त्यागं विना ब्राह्मणसंबंधाप्रसिद्धेर
द्या म्रियमाणे पितर्यत्यमिदं न ममेति तदुद्देशेन त्यागे कृते तत्संबंधप्रसिद्धेरन्वयव्यतिरेकाभ्यामुद्देशत्यागलक्षणैव क्रि
या संबंधापादिकावसीयत इत्याशयः। एतदेव विवृणोति यदीति। यदपि केन चिद्यजमानेन वाय्वाद्युद्देशेन त्यक्तं स्याल्ल
लाद्यनुष्ठानं शंकितं तदथा [illegible]लंलादेः फलान्वयेन प्रधानकर्मत्वावसायात्तदन्वयिनो वाय्वादिपदस्योपादेयार्थत्वावगते
र्देवतान्वयस्यानुष्ठानापाद्यत्वावगमादयुक्तमित्याह न चेति। एतदेवोपसंहरति तेनेति। तस्मादिति सिद्धान्तोपसंहारस्तं व्या
ख्याचष्टे अतश्चेति। कथं देवतान्वयस्यानुष्ठानसंपाद्यतेत्यपेक्षायामाह तथा चेति। द्रव्यविषयात्यागक्रियादेवताविषयाचो
द्देशक्रियातयोः समुदायं द्रव्यैकवड्डावृत्ते र्द्विष्टं यजतिचोदनानुष्ठापयति देवतोद्देशद्रव्यत्यागसमुदायं तस्माल्लोके कृ
तार्थत्वप्रसिद्धेरिति चतुर्थाध्यायस्त्रार्थस्यङ्टीकायां वक्ष्यमाणत्वाद्देवतावश्यं च यागसिद्धेस्तत्प्रयज्यमानं द्रव्यं यदुद्दे
शेनाग्न्यादिदेवतां कृत्वा द्रव्यं त्यजेदिति देवतोद्देशपूर्वकद्रव्यत्यागात्मकयागप्रयोगस्वरूपकथनार्थेनानेन सूत्रेण।

तत्र

ष्ठानापाद्यतादेवतावच्छेदकेत्याशयः। लक्षणार्थविषय इह हन्मध्यमरीकयोरीष्टीकायां च निषेधात्प्रयोगलक्षणालिश
यः। सूत्रांत्यलाघवे लक्षणशब्द इति सूचनार्थं लक्षणं करिष्यतीत्युक्तं। विधिशब्दादरोऽप्यनुष्ठानापाद्यत्वहेतुक एव। अन्यथाप
र्यायेणाप्यध्याहृतेनेन्द्रस्याग्न्यादिदेवतात्वसिद्धेः सन्मात्रस्य चाग्नेयादिशास्त्रार्थत्वात्तदादरो निष्प्रमाणकः स्यात्।
ननु इन्द्रदेवताविशिष्टयागविध्यनुपगमेऽपि श्रुतस्यालंलादेरप्रामाण्येनानुवादायोगात्तस्यापि विधेयत्वावगतेर्द्वावनुसं
वंधाधिकार विहितप्रत्ययातावान्क्रियाद्वयान्वयाप्रतीतेरनेकार्थविधिलक्षणो वाक्यभेदः स्यादित्याशंक्याह तत्रेति। कथ
तर्हि लाघवकृतानुरूपप्रयत्नस्यालंलविशिष्टतायाः समानपदोपादानलक्षणश्रुत्यावगतेर्वाक्यात्विन्द्रदेवताविषयतावगतेर्वाक्य
भेदं विनापि क्रियाद्वयविध्युपपादनमित्युक्तेत्याशंक्याह तत्रेति। सकृदुच्चरितस्य विधायकस्यानेकार्थविधिशक्त्यनुपगमादाह लि
लक्षणवाक्यभेदपरिहारेऽप्येकस्यानेकार्थतानुपपत्तिदोषस्य लक्षणो वाक्यभेदपरिहारार्थ इति सूचनार्थं गौरवशब्दः॥ लिंगदर्शनाच्च।
लिंगत्वमुपपादयति सोमारौद्रमिति। यजतिशब्देन विनाप्युक्तेरुत्पत्तिविधिपरे वाक्ये यजतिनानुवादः सोमारौद्रवाक्ये यागविध्यसंभवे
नानूद्यत इत्याशयः। ननु पशुसोमाधिकरणन्यायात् यजिमात्रस्य कर्मविधायकत्वाग्नीषोमीयवाक्यन्यायेनेहापि यजिना यागकर्म

वा०
५२

विधायित्वसिद्धेश्च न कृत्स्नमेतदधिकरणमित्याशंक्याह अग्नीषोमीयेपिवेति ॥ ५ ॥ विशये प्रायदर्शनात् ॥ अपरिसमाप्तार्थस्याविष्ट
त्रस्योपक्रमव्याख्यानात्परिसमाप्त्यर्थत्वापत्तेरगमकत्वाशंकानयुक्तेत्याशंक्याह सूत्रार्थस्य हिनिकारादिलिङ्गैर्व्याख्येयत्वात् सूत्रस्योक्तोर्थो हिनि
कारादिलिङ्गैर्व्याख्यातो ध्येयात्तस्य इति येवदन्ति तान्प्रत्यपाक्षस्त्रस्यागमकतापत्तिरुच्यत इत्याह न चैवहीति। हिनिकारादिकं योर्यत्वसर्व
मुच्यते तत्सूत्रारूढत्वेन तेनोपात्तं नान्यथेति श्लोकार्थः ॥ किमुच्यत इत्यपेक्षायामाह न किंचिदिति। विषयशब्देनोदाहरणसाध्ययोर्द्वयो
रपिपरिग्रहान्न विजानीम इत्यन्तेनाव्यमनेनव्याख्यानेन चाधिकरणस्य संस्कारशब्दानुषंगेणवत्सालम्भस्योदाहरणत्वज्ञानेनयावज्
क्रमशब्दानुषंगेणवसाध्यज्ञानेनलविष्यतीत्याशंक्यववत्सालम्भयोदाहरणत्वज्ञानेनयावज्क्रमशब्दानुषंगेणवसाध्यज्ञानेनलविष्यती
त्याशंक्यववत्सालम्भस्याग्निहोत्रप्रकरणाधीतत्वेनानारभ्याधीतसंस्कारविषयेणसंस्कारशब्देनोपादानायोगाद्यजिमत्वसाध्य
स्याव्यवहितस्य यावज्क्रमत्वसाध्यस्यानुषंगायोगात्परिहारार्थं प्रकृतमितिलाघ्यमुपलक्षणार्थत्वेनव्याख्येयत्वेनेति। तदेतदित्य
गमकत्वोपन्यासस्य हिनिकाराद्यर्थ्याकार्थात्यन्तशंकानिरस्त्यर्थत्व विवरणार्थं सूत्रानुक्तमपि प्रतिज्ञाद्यध्याहारस्य सूत्रकारा
स्थितत्वावसीयत इत्याशयः ॥ न चाध्याहारादिभिः सूत्रव्याख्याजिज्ञासासूत्रारम्भलाघवेशास्त्रादौ निषिद्धेत्याशंक्याह स्वत्येववेति।
दिकमवश्यं हिनिकारादिलिङ्गैर्व्याख्येयमित्यभिधानार्थेनेतावदितिलाघवेण सह व्याचक्षेत इति तस्मादिति। कृतार्थ्या पञ्चाप्रतिज्ञा २

पसंहारभाष्यम
गमश्चोर

राम
५२

५३

दुक्तं

ननु सामान्यतः किंचित्प्रतिज्ञाद्यध्याहार्यमित्यर्थापत्त्यावगमेऽपि स्वकारात्तित्रेतस्य न तद्विशेषस्य निर्द्धारयितुमशक्यत्वादुक्तम्
चेदूह्यादित्याशंकानिरासार्थं हन्तिकारेतिलाघवं व्याचष्टे सर्वथेति। युक्तिगम्येऽर्थे [illegible] पुरुषविशेषस्यानादरणीयत्वात् युक्त्यैवोक्तं य
हन्तिकारादिति सूक्तं। तत्र स्वकारात् उपात्तत्वात्तयात्यमित्यस [illegible] दाग्रहो न कार्य इत्याशयः॥ एवमेव वार्त्तिककारो हन्तिकारोक्तं
न्तिकारात् उपात्तत्वमात्रेणायात्यं न स वतीत्यतिदेशार्थमिदं हन्तिकारेणोक्तं। स्वकारात् उक्तथाथर्थस्य हन्तिकाराद्युक्तं चेय्य
त्यतैवेति प्रदर्शनार्थं तज्ज्ञाप्यमित्यस्मान्निर्यत् तत्स्वैपित्यारव्यातारो वर्णयंति। ननु स्मात् लिङ्गे त्वेन्ना मात्रेणोक्तमित्याह एतत्स
दर्शनार्थमिति। वर्णयतीत्येकवचनपाठोऽप्येतत्प्रदर्शनार्थं लाघवकृतस्य व्याख्यामकचेह हन्तिकारव्याख्यानं च वर्णयतीत्युपसंहारा
र्थं वेनव्याख्येयः। हन्तिकारोक्तोदाहरणसंदेहप्रदर्शनार्थमचेति लाघवं व्याचष्टे तदिहेति। न केवलं हन्तिकारवचनादिमामुदाहरण
संदेहो ज्ञायते किंतु श्रूयमाणमितिवत्सलुपावसृजतीति वत्सालंभेन स्वशब्दवत्त्वं च विधानाद्यागकल्पको देवतासंयोगसंदेहवावि
विशयशब्दपर्य्यालोचनयापीत्यभिधानार्थेनोपपद्यते चेति भाष्येणोक्तं युक्तियुक्तवच्छस्त्वनार्थः किल शब्दः॥ ननु इष्टिका
रेणत्रेधा संदेहस्योपन्यासत्वे कस्माद्भाष्यकारता त्रीवोमीये वत्सवि धिपदत्वे संदेहकालेनोपन्यासमस्तत्याशंक्यानिदुक्तमनुपन्यास

वा.
४३

कारणमाह तत्रेति । लिङ्गः प्राकृताग्नीषोमीयपश्वालंभविशेषणत्वात्कथमनेन विधायकत्वादापन्नेरित्याशयः तत्र एवं सति या
गकल्पकदेवतासंयोगाभावेनयजिमदर्शिधानपक्षे पितृस्तथान्तोपयसमनीयइत्याशंक्याह तत्र नैव चिति स्वरूपं वा कथ्यायेन क्षमा
सीति मंत्रस्य पृथक्त्या करणत्वेन विनियुक्तस्य देवताकल्पकत्वबुद्धिर्न विधीयते इति तेनैव इष्टदेवतासंयोगश्च क्रमेणेति प्रकारत्वाच्चि
नायक्रमशाहे नोक्तं । तत्र चेति नाद्येण ह्रिकारोक्तं सर्वपक्षस्य पश्चस्य समीपधारणवा विनोपावहृज नित्नात तदा द्विमालं सलक्ष
णेहेवलावात्सन्निहितवाच्यमिशहृ सामानाधिकरण्याद्वस्तुपशहद्र्य उक्तियोगे नवत्सवा विवक्षतीते दैवताकल्पकत्वाभावाद्देव
तावमाशंक्योदंविति यनेन देवतासंयोगप्रत्युदाहरणार्थत्वात्सूत्रस्य न स्वपक्षोपपादनेय तित द्यमित्युके सर्वपक्षोपन्यासस्य हि ऐन
र्थक इत्याशंक्य तथापीत्यादिनोपव्याख्याति स्मेत्यंतेन मंदाशंकानिवृत्त्यर्थतोपन्यासस्योक्तानतत्सर्वं ध्या वधे तत्रेति । निरासमात्रं तदि
कार्थ्यं नोपन्यासस्त्याशंका निरासार्थत्वेनातस्मामितिरा ध्यावयवं धा च श्रेयो नामेति । साम माध्यतो दृष्टेन्त्यर्थमालनतीति शितिला ध्य
मग्नीषोमीयं पशुमालभेतेति वाक्यस्य यथा था लभते यजिवाच्यकर्मवा विवाला वात्साध्यविकलहशंततत्वापन्ने रयुक्तमाशंक्याहे धा
समाधत्ते तत्रेति । धात्विनामने कार्थत्वात्स्वीसंयुक्तस्यगमे मैथुन वा विवक्षस्पर्शवाचिनो यथा लभते ः । शालिसंयुक्तस्य यागवाचि

तू

४३

वृकल्पनानविरुद्धेति यथाश्रुतत्राध्यसमर्थनार्थं केचिदाहुः ॥ ह्रियंगद्देदित्यत्र मैथुनप्रत्यायकहेत्वंतरालावाङ्मेरेवतद्धा स्विवकल्प

नं युक्तं यागपती तेष्वदृष्टदेवतान्वया च्यथा उपपन्नैव संतवान्न द्वयमिथैःतद्धाविनो यजेरथ्यं यथा उपपन्नैव कल्पनोपपन्ने ह्वीकेवाल

ततेर्यागे प्रयोगदर्शनाद्वाध्यस्थष्ट्चा स्तिदधातेर्वधेश्चलन्न ज्ञापनवा विद्वोपपन्नेनर्नालिरतेर्यागवावि विकल्पनायुक्तेति स्वमतं ॥ आनर

ते ॥ पूर्वाधिकरणेयागानुमापकत्वान सिधानात्वाणि संयुक्तो यच्चालनति त्वत्रयागानुमानमितिद्यासेर्यजानुमानोमानत्वेनेत्यनुमाने

शब्दाहृत्वाद्याख्येयं ॥ तथैवेत्यालनतिनायागानुमानानुमानातिदेशाद्यागानुमानहेतुःस्वधासीति मंत्रवर्णकल्पदेवतात्वयः ॥ श्रुचित

कीदृगनेन सामाप्यतो दृष्टे पूर्वपक्षः कृत इत्यपेक्षायामाह तवेति ॥ उपपदाक्रांतशक्तित्वेन विधायकस्य कर्मविधायित्वाद्योगाद्दातोरुव

दार्थत्वादगतेः कुतोनुवाद्यप्राप्तिरित्यपेक्षायां प्राणिसंयुक्तत्वेनाथग्नीषोमीयालनतेर्हूरस्यश्चापितु द्विस्थत्वान्तस्यत्वदेवतात्वयद्वाराय

जिवाख्यज्ञापकत्वदर्शनाद्वत्समालनेनेत्यालनतिरग्नीषोमीयवाक्यविहितस्य यजिवाख्यकर्मणोनुवादोवत्सविध्यर्थ इति पूर्वपक्षांतरो

क्त्यर्थमथवेतिना ख्यंख्यावष्टे प्राप्तेवेति ॥ द्विविधः पूर्वपक्ष उपसंहरति उक्तीति ॥ स्वधासीति मंत्रो वत्सालंभे विनियुज्यते न वेति संदेहात्सपक्षशब्दोदे

वतावाचीनवेति संदेहात्ववत्सालंभे देवतासंयोगसंदेहो यो यथा व्यवस्थितानुपपक्तयावद्रूक्तस्वरूपसाध्यसिद्धौ विशयशब्देन हेतुतयोक्त

कर्म

नु ४

इत्येवं सूत्रं व्याख्याय स्वयं सिद्धान्तमाह सिद्धान्तस्त्विति । नालम्भतिना यागाभिधानमभिप्रेत्य सर्वाधिकरणे यागः कल्पितः तत्रोक्तं कस्मा
दित्यपेक्षायां यागाभिधाने तस्य लोके शब्दस्य दर्शनादिति हेतुगर्भं विशेषणं सामान्यतो दृष्ट्या लाभवे अस्य बुध्यमानत्वे तैत्यादौ यागविधा
शे हेतुगर्भं विशेषणं देवतासंबन्धाभावादिति भाष्येण विधेयशब्दस्य सूक्तत्वाद्देवतान्वयाभावो नास्त्यर्थतः सूचितेन चेत्यनेनोक्तं आलम्भमा
त्रं संस्कारः शब्देन संस्कारस्याप्रकरणमिति संस्कार[illegible]शब्दस्योदाहरणोक्तये उपांशुयागस्य चित इतीह शब्देनोक्तं । आलम्भमात्रशब्देन च यावदुक्तं
वेति यावदुक्तः शब्दस्य प्रतिज्ञोक्तये उपांशुयागस्य चित इति यावदुक्तं तेनेत्यनेनोक्तं प्रायदर्शनस्य लिंगमात्रत्वं भाष्योक्तं विवृणोति । तथा चेति । आलम्भ
यशब्दस्यालीढे प्रयोगात्प्राय शब्दस्य प्रयोजनवाचित्वमंगीकृत्य प्रायशब्दस्य दर्शनेन दृष्टार्थविलक्षणहेतुकार्यत्वं दृष्टार्थत्वाभावे तिभाष्यो
क्तं विवृणोति दृष्टार्थत्वं चेति । तथा चोपपद्यते तत्रोपांशुयागेऽप्यनयोर्थो ॥ अर्थवादोपपत्तेश्च ॥ अर्थवादश्चेत्यस्य यतः सूत्रव्याख्यानार्थत्वाद्भाष्य
व्याचष्टे वत्सेति । यामिरेकत्तो व्याख्यार्थमथेति भाष्यं व्याचष्टे मारणार्थत्विति कथं वत्सालम्भस्य गोप्रसवनार्थत्वमाशंक्याह स्तन एव उन्नरि
ति । वायुः करणात्वाद् गोवत्सस्नेहात्तु तन्त्रौ वायुकरणे यदि ह यस्य योगादुत्पन्नो वा वायुकरणस्य स्नेहोत्पादकत्वायोगात्सर्वोऽपि रितो क्षेत्रप
न्नान्तरोक्तिः । स्नेहातिशयोत्पादकत्वोपपत्ते स्वर्वोऽपि पदार्थ एव साध्ये हेतुयोजनार्थं तस्मादपीति भाष्यं व्याचष्टे तस्मादपीति । संस्कारस्य

त्व

स्या

र्थशब्देन तदर्थः श्रुतिसंयोगात्॥ अर्थवादिकस्य देवतात्वस्य विध्युद्देशानाकांक्षितत्वेनाग्रहणात् सर्ववदिहापि
यागकल्पकदेवतात्वग्रहणाभावेन यागवद्युक्तं सिद्धेरनारभ्यमिदमधिकरणमित्याशंक्याह सर्वमिति निर्वापस्येहाश्रुतत्वात्त
दुदाहरणतानुपपत्तेरित्याशंक्य वरो यागार्थत्वमिति देशग्रामस्थानिर्वापस्यापि वरुद्राय यागार्थत्वापत्तेश्च वरो यागार्थत्वनिरासे
निर्वापेऽपि यागार्थत्वनिरासो लब्धवतीत्युक्तेय अर्थाधिकरणेष्टदेवतासंयोगयुक्तवाक्यमात्रस्योदाहरणत्वादथ यथाग्नेय
सवनीयस्तुषाकरोतीत्यादौ यागविधाभिसिद्धेर्निर्वापालंभयोरनुदाहरणत्वात्तस्यानुदाहरणानुपपत्तेरपरितोषादधिकाशंका
रंभहेतुतयोक्तानर्थवादोक्ताया अपि देवताया विध्युद्देशे नानाकांक्षितत्वाद्ग्रहणानुपपत्तेरयुक्ता देवताशंकेत्याशंक्य देव
ताकांक्षासिद्ध्यर्थं वरो यागार्थत्वमुपपादयति तत्रैवेति। वर्वादिर्हि विःशब्दवाच्यत्वप्रसिद्धेर्जुहोतेश्च। इष्टिविज्ञप्तेपितदिष्टादिश्यस्य
सिरितीमिश्रत्वाद्येकतेह विःशब्दस्यात्पनेः सोऽर्यवरुमित्यादौ वयागार्थत्वदर्शनाद्विःशब्दसामान्यतो दृष्टत्वाद्यागार्थतावसी
यत इत्याशयः। यजिश्रुतिदेवतात्वयानिरपेक्षत्वस्य नायोत्पत्तिकशब्देन प्रख्यालाविकतोक्ता। वरो हीति स्वर्वपदलक्षणार्थं चानेन व्या
ख्यातं। यथेष्टविनियोगार्थे वरेवरोः श्रुतत्वं प्रसह तन्निसिद्धेर्विध्यानर्थक्यप्रसंगाद्यथेष्टविनियोज्यत्वलक्षणस्वत्वस्य यागस्याव

शपकत्वावगतेस्तस्य च देवतोद्देशपूर्वकद्रव्यत्यागात्मकयागैकदेशत्वाच्चरुकैमर्थ्याकांक्षायामेकदेशेन बुद्धिस्थीकृतस्य
यागस्य श्रेयोजनकत्वमस्तीति:शीघ्रं भवतीत्यतस्तदाशयेनावचरोर्हीति साध्यमिति सूचयितुमाह सर्वथा चेति चरो रूपधानार्थतावग
त्या नैराकांक्ष्याद्यागार्थताकल्पना नयुक्तेत्याशंकानिरासार्थं नेति साध्यं नोपधानं कार्यं किंतु प्रतिपन्नं सच्छास्त्राच्च यज्ञोपयोग
विनानुपपन्नेरूपधानान्वयस्यैकैमर्थ्याकांक्षानुकूलत्वात्तत्सिद्धेर्यागार्थत्वकल्पनोचितेत्येवं व्याख्येयमिति सूचयितुमाह चरुमि
ति यागार्थत्वसंभावनायामपि वचनशक्त्यैव विध्युद्देशे देवतासंबंधाभावात्प्राजापत्यमिति श्रवणाच्च यागार्थत्वानिश्चयादुपपन्ने द्वे दैव
तानाकांक्षत्वाद्दर्थवादस्य च सत्तावमायामपि विध्युद्देशानाकांक्षितदेवतासमर्पणशक्तेर्न यागार्थतायुक्तेत्युच्यत इति सा
ध्येणाशंक्यत उच्यत इत्यनेनानर्थक्यपरिहाराय नाकांक्षितापि देवता विध्युद्देशे नान्वीयत इत्युक्तं तच्चावश्यं वाक्यशेषे चेति
विधिपर्यवसानायैकदेवत्यत्वौषधद्रव्यत्वसामान्येनाग्नेयविध्यंतावयं दर्शयन्सर्वं पन्नमुपसंहरति तस्मादिति । उपधानस्यापि
द्वितीयया शेषकार्यत्वावगतेरेककार्यत्वादौपदेशिकस्य नित्यदेशिकशेषकार्यबाधकता युक्तेति सूचनायां तत्राह । चरोः स्वा
तंत्र्यात्त्ववाक्यएव यागार्थत्वावगतेः श्रेयोजनानाकांक्षत्वाद्वाक्यांतरस्थत्तोपधानार्थत्वेन यागार्थत्वनिरासो न युक्त इत्याशंका

४५

व

निरस्यन्नसिद्धांतमाहैवमिति। भोजनार्थं तद्रूपमपक्वौदनेवरूशब्दवाच्ये लोके हविःशब्दप्रयोगात्तद्यागार्थत्वं व्यस्तिवाराच्च
त्रु हविःशब्दसामान्यतो दृष्टः स्याद्यागार्थत्वानवगतेः प्रयोजनाकांक्षत्वाद्वाक्यांतरश्रुतोपधानार्थतायुक्तेत्याशयः श्लोक
नात्पर्यं व्याचष्टे नैवाइति। विध्यानर्थक्यपरिहारायस्रुवनिष्कृत्यावश्यकत्वावगमेपि यागावगतिर्नास्तीति स्रुवनार्थयागेनेत्युक्तं
यावत्प्रतिपत्तिर्वा यागोपयोगकल्पनोक्ता साध्युक्तेत्याह नवेति। प्रतिपत्तिरितियदुक्तं तन्नवेतीतिकरणार्थः स्थलार्थस्यापि
चोपधानकर्मणः स्थलनिर्वर्तकत्वरूपद्वारा स्थलनिर्वर्तकत्वेनोपधानं चरोः प्रतिशाषान्यात्तद्द्वितीयोपपन्नेन द्वितीयत्याप्रति
पत्तिर्नावगतिरित्याहार्थकर्मत्वापि वेति। श्रुतिसंयोगव्याख्यार्थमुपदधातिनेत्यादिनाष्टे एपोपधानान्वयश्च चरोःप्रतिपत्तो देव
तान्वयश्चानुमानिक इत्युक्तं तद्व्याचष्टे वेधावेति। श्लोकं व्याचष्टे नीवारेति। अन्नशब्दोक्तस्यादनीयत्वस्यापक्वेषु नीवारेष्वयोगाद्व
स्त्वतेषु देवतान्वयानुमानं। विष्णूयजतीत्यादौ द्वितीययापि देवतात्वकल्पनादर्शनाद्दादिशब्दः प्रयुक्तः। कृदंतान्नशब्दप्रयोगा
कर्तृत्वाविवक्षा भोक्तृत्वावगतिर्देवतात्वकल्पनाहेतुः तस्मादित्युपसंहारश्लोकं व्याचष्टे तस्मादिति। श्रुत्यासमन्वयश्चरोरुप
धानयोगादित्येवं श्रुतिसंयोगव्याख्यानार्थं तत्रश्चेदित्युत्तरश्लोकव्याख्यावतारार्थं कृत्स्नशब्दव्याख्यानायैवकारः। यद्वितिश्लोकं बाह

मिति३

वा· ४६

स्पत्यानीवारा इत्येवंविधार्थवादाश्रवणादयुक्तमाशंक्य तैत्तिरीयशाखास्थस्य वार्हस्पत्योऽलवतीत्येतद्वैरवहस्साह्लादनं यए
वचरुरितिपूर्वनिर्दिष्टचरुसमानाधिकरणवार्हस्पत्याशब्दवतो वाक्यस्य बृहस्पतेर्वा एतदन्नं यन्नीवारा इति शाखांतरीयवाक्य
तुल्यार्थत्वसूचनायानेन प्रकारेणोपलक्षणायैतद्वाक्यं सूचयितुमाह येषामिति वाक्यशेषे देवताकीर्तनानर्थक्यपरिहाराय
नाकांक्षितापि देवताविध्युद्देशेनग्रहीष्यत इत्याशंक्य प्रशंसार्थत्वेनार्थवत्वोक्त्यर्थं याहशमित्युक्तं बृहद्बृहच्च बृहद्बृहति धात्व
र्थानुसारेण ब्रह्मशब्दवद्वेदवाचित्वात्पतिशब्दस्य पालयितृवाचित्वाद्ब्राह्मणानां तपःस्वाध्यायजब्रह्मा ब्राह्मणा वेदस्तस्य ये
इति वेदपालयितृत्वस्मरणाद्बृहस्पतिशब्दस्य ब्राह्मणवाचित्वप्रतीतेर्यदन्नं ब्राह्मणस्योक्तमिति तद्ब्राह्मणश्राद्धे वानप्रस्थारण्य
मुख्यदनीयारण्यनीवारसाशब्दस्य स्मृतेर्ब्राह्मणसंबंधित्वरूपवार्हस्पत्यत्वं कीर्तितमित्याशयः ६॥ यद्वेति लाघवं चर्वादीनामिति वा
र्त्तिकेन व्याख्यातत्वादुपेक्ष्य तस्मादिति सिद्धांतोपसंहारस्ताघवव्याख्येयं तस्मादिति ७॥ ॥पात्नीवते तु पूर्वत्वादवच्छेदः ८॥ ॥वा
क्यशेषस्थदेवताद्वयस्य विधेयत्वाभावाद्यागकल्पकत्वे निरस्ते पर्यग्निकृतपात्नीवतमित्यत्र विध्युद्देशस्थत्वाद्विधेयत्वमाश
क्य विध्युद्देशस्थत्वाद्विधेयत्वमाशंक्य विध्युद्देशस्थस्यापि प्रत्यभिज्ञानेनाविधेयत्वाद्वादकल्पकतेहोच्यते इत्यनंतरसंगतिं पत्नी

४६

वद्देवतासंयोगलक्षणगुणस्याश्रुपत्नीवद्देवत्यपशुयागाद्भेदकोनवेतिगुणनिमित्तभेदाद्भेदविचारात्तद्गुणप्रकरणसंगतिंस्पष्टत्वा
दत्तुक्त्वातदवांतरसंगतिमाहएतेनैवेति।यथोत्सृजतिश्चद्व्यागात्तुमानमितिख्यापदर्शनेनोत्सृजतेरालस्वतिद्यागानुमापक
वलक्षणयजिमद्धाविवशंकायोगाडत्सृजतिशब्दस्यतत्परविधायकप्रत्ययलक्षणार्थः।एवंशुक्लातिचिनोतिशब्दाववि धाचिमि
त्युदाहरणसाथंख्यावयेपात्नीवतमिति।तवेतिसंदेहलाथंदेवतोद्देशपूर्वकद्रव्यत्यागात्मकत्वयागस्यसोत्सर्गस्यत्वाडूवा
क्यादेवप्राप्तेर्विधेयत्वायोगाद्देवतोद्देशनिरपेक्षद्रव्यत्यागात्मकस्यत्सर्गस्यनवमोपांत्येपर्यग्निकृतानारण्यानुत्सृजंतीत्युदा
हृत्यकिमनेनेशानायपरस्वतआलरतेवसंतायकपिंजलानालरतस्त्यादिवाकयवाक्यविहितस्यारण्यालंस्यकैमर्थ्याक
न्नायांयदेनंस्वरूपमुपदधातीतिवत्प्रयोजनत्वेनदेवतोद्देशनिरपेक्षोद्रव्योत्सर्गोविधीयतेकिंचेशानायेतिचतुर्थ्युक्तदेवतासंयो
गेनविहितंयागंसृजतिनारण्यंपर्यग्निकरणांतंगरीतिविधानाकर्मशेषःप्रतिषिध्यतइतिसंदिग्धेपर्यग्निकृतानामुत्सर्गो
तादर्थ्यमुपधानवदितिस्वेणद्रव्योत्सर्गविधिंस्वपक्षयित्वाशेषप्रतिषेधोवार्थोसावादिजंतवदित्यनेनदेवतोद्देशनैरपेक्ष्यादे
वतासंयोगरूपार्थस्यावापत्त्यानिषेधस्यामानत्वात्सिद्धांतवचनघटकात्रपपत्तेस्वकमाशंक्यायडत्सृजतितान्त्यर्थनिकृतमित्

त्सर्गस्यपर्यग्निकृतशब्दोक्तपर्य्यग्निकरणांतागरीतिलक्षणगुणविशिष्टस्वरूपेणविधिर्विवक्षितोनस्वरूपेणेत्येवंव्याख्यास्खना
पूर्वकं सूर्वइतिभाष्योक्तस्यपात्नीवतानुवादासंभवस्यपूर्वपक्षहेतोःपात्नीवतशब्दार्थस्यविधेयत्वेनसिद्धितेनवतारातद्वता
रार्थस्ययंपूर्वपक्षहेतुमाहतत्रेतिपर्य्यग्निकरणांतागरीतिविधिर्गुणशब्देनसूचितःनहिवक्षितत्वोपपादनार्थवचनस्यक्तिह्य
प्रतिलानस्यसंदेहहेतुत्वंलाघ्योक्तंदर्शितानवमोपान्त्यन्यायेनत्वग्राह्यंगरीतिविधानस्यसिद्धत्वात्पौनरुक्त्यमाशंक्यतत्रारूप्य
शब्दार्थस्यप्राप्तत्वाद्विधेयत्वाशंकानुपपत्तेःपर्य्यग्निकृतानुत्सृजंतीत्येवाक्येपर्य्यग्निकृतानुवादेनोत्सर्गविधिरुत्सर्गानुवादेनवा
पर्य्यग्निकृतविधिरितिचिंत्यतेरहतुकिंपात्नीवतमुत्सृजंतीत्यनयोर्वाक्ययोर्न्यायेनयागविधिःपर्य्यग्निकृतमुत्सृजंतीत्यत्र
ग्राह्यपर्य्यग्निकरणांतागरीतिविधिरित्यपौनरुक्त्यस्यवनार्थवचनह्ययद्यक्तिप्रतिलानस्यसंदेहहेतुत्वोक्तिर्युक्ता।उत्सर्गवि
धौतुपर्य्यग्निकृतमुत्सृजंतीत्यत्रवाक्येत्वाष्ट्रवाक्यात्प्राप्तस्योत्सर्गस्यविधेयत्वायोगादुत्सर्गान्तरविधानासिद्धातेपिकर्म्मान्तर
त्वापत्तेर्वचनद्वयोक्तिद्वयप्रतिलानस्यसंदेहहेतुतानयुक्तेत्याशयःपात्नीवतशब्दस्योत्सृजन्तिपरारख्यातावयेपिप्रत्यभिज्ञायमा
नार्थत्वेनाविधेयार्थत्वाद्यागकल्पनानुपपत्तेःकिंयागांतरत्वेकारणमित्येवंकृतइतिप्रश्नंव्याचष्टेकिंचेतिसर्वइत्यन्तरलाध्यं

व्याचष्टे नचेति। नत्वेवं सत्याग्नेयवाक्यविहितस्य पत्नीवाक्ये प्रत्यभिज्ञायत इति हि शब्दार्थे चशब्दः। अपि चेति। तात्पर्यं व्याचष्टे पर्यग्निकृते मि
वाक्यस्थोत्सर्गविधिं वदता पात्नीवतशब्देन वाक्यद्वयेऽप्युत्सर्गविधिर्वाच्यः स्याच्च पर्यग्निकृतत्वविशेषणे विशिष्टानुवादलक्षणो वाक्य
भेदः स्यादित्याशयः। ननु पत्नी विद्यते ऽत्र त्यागपदार्थे पत्नीवदुक्तः प्रश्ने ऽको त्यागपदार्थ इत्यपेक्षायां सर्ववाक्येषु कृतस्य ग्रहस्य पात्नीव
तशब्दान्नीत्यत्राग्रेऽपि वं कृतस्याथ त्यागपदार्थत्वावस्थायां तत्प्रत्यभिज्ञोपपत्स्यत इत्याशंकां निरासं स्वयत्नो कर्तव्यं ईह्या व्याचष्टे यदि
हीति। पात्नीवतं गृह्णातीत्यत्राग्राश्य पत्नीवन्निति मंत्रवर्णाद्ग्रहपदार्थत्वप्रतीतिर्युक्ता उक्तं कर्मान्तरस्थस्य ग्रहस्य कर्मान्तरे त्यागाश्रमा
णतावाद शिवशब्दवशात्त्यागपदार्थत्वेनेऽपि पत्नीवत्त्वं स्थितं तल्लाभेऽस्मात् नयोपपन्नः। अन्यः पत्नीवान्देवतानन्तु पत्नीवांश्च ष्टा ये न प्रत्य
भिज्ञा स्यादिति। इमहेन्द्र दृष्टान्तेन स्पष्टयति। अन्यालिङ्गानेपीति। इमहेन्द्रवद्देवतान्तरयोगाभावादित्यपि शब्दार्थः। उत्तरार्द्धं व्याचष्टे पात्नीतेति। न
न्वतन्त्रत्वात्पात्नीवतशब्दस्य न विशिष्टानुवादापत्तिरित्याशंक्याह अथवाहितेति। किंचस्यार्थे वेहोत्सर्गविधी ये तत्पर्यग्निकृतशब्दा
र्थविध्यर्थवा तत्राग्नेयपत्नीदेवतोद्देशपूर्वकद्रव्यत्यागरूपस्योत्सर्गस्य वाक्यवाक्यादेव प्राप्तेः पुनः श्रुत्यानर्थक्यमाह प्राप्त एवचेति। द्वि
तीये तु लोहितो प्रीषादिवत्पर्यग्निकृतशब्दस्य विशेषणपरत्वावगते [illegible] स्याद्यातिदेशेन प्राप्तत्वाद्विध्या [illegible] नर्थक्यामि

व

व४

त्याह नवेति। ननु पात्नीवतमुत्सृजतीत्यथवयेऽस्मिन्यागे वृद्धापत्नीवता सह वैकल्पिकः शुद्धः पत्नीवान्विशिष्यत इत्याशंक्या
ह नवेति। एतद्व्यासं वदृष्टपदध्यवायापत्तेश्चचिदोषव उक्तमेवेत्यतः पश्चाद्वाद्यमपि न च बाह्यतन्त्रोपकारेत्याद्युक्तमेवेत्यंतं
वार्त्तिकं नवमोपांत्यसाध्यवक्ष्यमाणार्थकथनायेति सूचनार्थमायुक्तं। ननु यथाज्यलागप्रनष्टश्रुतिरहमेधीयद्यापूर्ववज्ञाप
नार्थेति दृशमेवक्ष्यते तेतथेह केवलपर्य्यग्निकरणप्रनष्टश्रुतिः पात्नीवतपशुयागद्यापूर्ववज्ञापनार्थो भविष्यतीत्याशंक्याह न
वेति। पर्य्यग्निकरणस्याप्राकृतत्वेन्द्रोपकारव्यायोगात्प्राकृतत्वेवाप्राप्तत्वेन विधेयत्वायोगात्कथमपूर्वविज्ञापकतेत्याशंक्याप्रा
कृतेत्युक्तं। स्वरूपेण प्राप्तस्यापि पात्नीवतयागांगत्वेन विधानोऽविधेयत्वादगत्या सिद्धेस्तैरांकां त्वाद्योतनान्नापूर्वविज्ञापकतेति
परिहाराशयः। ननु पर्य्यग्निकरणांतां गकलापविध्यर्थं निर्देशं पर्य्यग्निकरणवोक्तार्थत्वेन पर्य्यग्निकृतशब्दस्योपसर्जनत्वस्या
विवक्षितत्वाद्विधेयत्वोपपत्तिरित्याशंक्याह नवेति। पर्य्यग्निकरणनिर्देशः क्वावश्यंगान्तरनिर्देशप्रतीतेर्न पर्य्यग्निकरणांतताव
सीयत इत्याशयः। ननु पर्य्यग्निकरणांतां गरीत्यनलिधानेपि क्रमप्रत्ययस्य निश्चसंशत्वेन श्रुतकालवाचित्वात्पर्य्यग्निकरणानंतर
कालोत्सर्गप्रतीतेरुत्सर्गोत्तरकालीनपदार्थानिषेधे उत्सर्गपर्य्यग्निकरणमध्यवर्तिपदार्थनिक्षेपावगमात्पर्य्यग्निकरणोत्तर

त्तैरांकांस्यद्योतकत्वेनापूर्वत्वज्ञापकतायुक्तेत्याशयः। पर्य्यग्निकरणस्य पशुविशेषणत्वेननिर्देशात्प्रसिद्धिं च विनाविशेषणत्वायोगात्प्रसिद्धत्वे ना ५

कालांगभूतकर्म्मविछेदो विज्ञास्यत इत्याशंक्याह न वा सावित्ति। पदार्थांतरव्यवधानेपि श्रुतकालत्वोपपत्तेरानंतर्य्येनाव
सीयत इत्याशयः। पर्य्यग्निकरणकालोत्क्यानंतर्य्यश्रुतिं त न अश्रुतकालत्वमात्रस्यातिदेशतः प्राप्तेर्विध्यानर्थक्यपरिहारा
र्थतान्यपर्य्यग्निकृतानुत्सृजंति ब्रह्मसाम्न्यालभंते इत्यत्रानंतर्य्यलक्षणा यथा संकर्षे वक्ष्यते तथेहाप्यानंतर्य्यलक्षणा स्वविध्य
तीत्याशंक्याह न वेति। प्राजापत्यपशुषु एकादशे कर्म्मशेषप्रतिषेधं पूर्व्वपक्षयित्वा ब्रह्मसाम्न्यालभंत इति पर्य्यग्निकरणोत्तरका
लीनानां संस्काराणां कालांतरेनुष्ठेयं वक्ष्यते: सर्वथाप्रतिषेधायोगेन पर्य्यग्निकरणोत्तरकालत्वमात्रनिषेधस्य वक्ष्यमाणत्वा
त्तत्सिद्ध्यर्थमानंतर्य्यलक्षणा युक्ता इह तु कर्म्मांतरविधाने निर्देशप्राप्तपर्य्यग्निकरणानुवादत्वेनापि पर्य्यग्निकृतशब्दस्य वा
क्यत्वयोपपत्तेः नानंतर्य्यलक्षणा युक्तेत्याशयः। सर्व्वांगानां तु पर्य्यग्निकरणानंतर्य्यसंपादनाशक्तेरानंतर्य्यलक्षणायां विरोधः
स्यादित्याह सर्व्वांगेष्वेवेति। न तु पर्य्यग्निकृतावस्थायोत्सर्गविधावर्थादानंतर्य्यंलिविघ्यतीत्याशंक्याह एतेनेति। नावस्थापि
कृतयोच्यत इत्याशयः। पर्य्यग्निकरणावस्थायायाश्च स्वरूपेण प्राप्तत्वादुत्तरावस्थापरिसंख्यार्थत्वे त्रिदोषप्रसक्तापत्तेर्विधेयत्वेन संख
वतीत्याह वोदकेनैव तावदिति। सर्व्वपक्षमुपसंहरति तस्मादिति। विधिसमाप्त्यर्थमिति कर्त्तव्यतापेक्षायां पत्नीवन्नालक्षणायु

णसामान्येनचाङ्गप्रकृतिकत्वेसिद्धेहितेपूर्वपक्षवादनास्थयाग्नीषोमीयप्रकृतिकत्वेप्यविरोधइत्युक्तं।सिद्धांतमाहइती
ति।नकर्म्मांतरमितिसाध्यावयवत्वस्यपूर्वार्द्धेनव्याख्यातः।पूर्वपक्षैवेत्युत्तरार्द्धेन।प्रकृतत्वाच्चात्वाष्ट्रपात्नीवतत्वलक्षणविशेष
णद्वयविशिष्टत्वात्तत्पत्यासिद्धान्तेनसंगच्छतीत्याशंक्याहपात्नीवतेति।द्वंद्वनिर्देशेप्येकदेशेनसमुदायलक्षणयात्वाष्ट्रा
त्वष्टृतोक्तिर्युक्तात्वाष्ट्रंपात्नीवतमितितुलेदेननिर्देशाद्विशेषतइतिमन्तोताहष्टांतेनसूचितं।पर्य्यग्निकरणांतांगणस्यविधे
यत्वसिद्ध्यर्थंसामान्यतस्तावद्गुणस्यविधेयत्वमाहपर्य्यग्निकृतमिति।शंका।सर्वपर्य्यग्निकरणांतांगणस्यविधेयत्वमुपपादयितु
मारभतेनन्वेवेति।याउत्पन्नत्वाद्विशिष्टस्यतावाद्विधेयत्वोक्तांतांपरिहरतियद्यपीति।नात्पशोर्गवत्पर्य्यग्निकरणमनुष्ठेयंतथावि
धीयतेयेनतन्मात्रग्रहणंस्यात्किंतुनिष्पन्नपर्य्यग्निकरणत्वंपशोर्यागांगत्वयितयाविधीयतेतच्चयथाप्राप्तस्योपादानात्स्वांगि
कृतेतेषुपर्य्यग्निकरणानुपपन्नेपदंतावसीयतइत्याशयः।नन्वेवमप्युत्तरेषामर्थंगानामतिदेशात्प्राप्तेःपर्य्यग्निकरणांतत्वा
सिद्धिरित्याशंक्याहइममेधीयन्यायेनापूर्वत्वावसायात्तदंतत्वसिद्धिमाहकथंतावेति।पर्य्यग्निकरणांतस्यांगगणस्यप्रकृतावि
तरेतरनिरपेक्षत्वात्निवासयोगेपवाक्यात्साहित्यावगमेपिप्रत्येकंकृतरूपकारसाधनत्वेशक्यवगतेश्चत्वाष्ट्रपशुयागेप्रत्येकत्व

केयनांगतयाविधानात्तदुपकारसाधनत्वेनावगतस्यातिक्रमकारणाभावात्साकृतांगांतरानपेक्षत्वादसर्वत्रावगतेर्नाति
देशोस्तीत्याशयः। अतिदेशाभावेपि सादृश्येन बुद्धिस्थतया धर्मनौदोन्मुखत्वात्स्वकृतित्वव्यपदेशाविरोधः। अतस्यैवाकय्य
पर्यग्निकरणांतागरीति विधायित्वे निवृत्त्यर्थीवच्छेदशाब्दे न सुज्येतेत्याशंक्य फलेनोत्तरांगनिवृत्त्यर्थत्वोक्तिमुपपादयति। त
त्स्यैति। पात्नीवतस्य तत्सृजंतीति सन्निहितान्वयत्यागे न पर्यग्निकृतमुत्सृजंतीति व्यवहितान्वयाभ्युपगमे को गुणो न विद्यतीमि
किमिति लाघवेन दृष्टगुणोक्त्यर्थं यजिमन्नातावदिति लाघवमुपलक्षणार्थत्वेन व्याचष्टे एवं चेति। आदिशब्देनाकृतांगातिदेशक
ल्पनोक्ता। गुणांतरोक्त्यर्थमुत्सृजतिशब्दस्येति साध्यं सिद्धांतेपि पर्यग्निकरणांतत्वविशिष्टरूपेणोत्सर्गविध्यभ्युपगमेन वाक्य
र्थविध्यविशेषाद्युक्तमाशंक्यापि चेति वक्ष्यमाणलाघवालोचनया पूर्वपक्षे पर्यग्निकृतं पात्नीवतमिति पदद्वयान्वयापादना
शयेन व्याचष्टे नवेति। ननु देवतोद्देशपूर्वकद्रव्यत्यागरूपस्योत्सर्गस्य श्रवाद्वाक्यादेव प्राप्तेरुत्सर्गविध्युक्तिरयुक्तेत्याशंक्याध्या
राग्निहोत्राधिकरणोक्तेन मार्गेण गुणविधावपि धात्वर्थावच्छिन्नभावनाविधिं मत्वोत्सर्गविध्युक्तिरित्याशयेन परिहरति। पर्यग्नि
करणांतेति। शंकानिरासार्थत्वं क्तशब्दस्य अनंतरं तत विप्रकर्षादित्यनेनोत्सर्गसंबंधित्वेनांगगणविधानादुत्सर्गस्याविधेयत्वोक्तिरि

वा० तदुक्तं तदुपपादनार्थं तदुद्देशेनेत्युक्तं । कर्म्मान्तरेति साध्यं सिद्धान्तेप्युत्सर्गानुवादाविशेषादयुक्तमाशंक्योत्सर्गसंबंधित्वेन

५० पि पूर्वपक्षेर्थान्तरविध्यसंभवाशयेन व्याचष्टे । तत्पक्षे विति । तद्गुणस्य विधीयेरन्नित्यनेन च व्याये न देवतातद्धिते नैव देवतोद्दे

शपूर्वकद्रव्यत्यागरूपोत्सर्गविधिसिद्धेः पर्य्यग्निकृतशब्दार्थो विधौ च तद्भक्त्यानर्थक्यापत्तेः पर्य्यग्निकृतं पात्नीवतं कुर्व

न्ति निःपूर्वपक्षे पर्य्यग्निकरणविशिष्टपात्नीवततानि विधिमापाद्यापि वेति साध्ये णवाक्यपात्नीवताया श्वाक्षुवाक्यात्पूर्वपक्षे पर्य्य

ग्निकरणविशिष्टतायाश्चातिदेशात्सामर्थ्येण उक्तं तदापादनाशयस्य नवपरपदेति वार्त्तिकेन व्याख्यातत्वाद्रूपणाशयस्य

च पर्युक्ततत्प्रत्यभिज्ञानादित्यनेन व्याख्यातत्वाद्व्याख्यायते । माऽदिति सिद्धान्तोपसंहारसाध्यं व्याचष्टे । तमादपीति । कल्पनाले

शपरपदान्वयविधिविप्रकर्षधावथीत्यन्तपारार्थ्यालाभप्रकृतप्रत्यभिज्ञानलक्षणहेतुचतुष्टयपरामर्शार्थं वं तस्मादुद्

द्युक्तं वयितुमपि शब्दः । अपि वेति पूर्वपक्षोक्तदोषं परिहरति साध्येणानुसाध्यत्वेनैव द्रव्यत्वेन परिहृत्यात एवेत्यनेन पात्नीवतशब्दे

न वाक्यपात्नीवतशब्देन वाक्यपात्नीवतानुवादायोगदोषः स्वयं स्वशब्दः पात्नीवतस्थेति साध्योक्तः परिहृतः । तदुक्तं यमेके हेल

याव्याचष्टे । प्रकरणादेव चेति । पर्य्यग्निकरणावस्थाविशिष्टपात्नीवतानुवादलक्षणस्यापात्नीवतत्वरूपेण वैकेनांशेन त्वाक्ष

५०

पात्नीवतव्यपदेशलक्षणस्य चोपालंभस्य परिहार इति समासार्थः। तस्मादित्यधिकरणार्थोपसंहारस्तात्पर्यं व्याचष्टे तस्मादिति
॥ ५॥ अद्रव्यत्वात्केवले कर्मशेषः स्यात् ॥ ॥ न कस्यचिदपीत्यनारभ्यवादोक्तेः संदेहद्वैविध्यसूचनार्थत्वमाह अनारभ्येति। अत इति सि
द्धांतवचनव्यक्तिस्तात्पर्यशेषेण ग्रहविधिरित्येतावता वर्तमानेन यावदुक्तं च सर्वपक्षांतरोक्तिरित्याशयः। अग्न्यालंभादिवद्भक्त्या
तिरपि यजिमद्विधानेनैवेति प्रासंगिकत्वेन संगतिर्दृष्टांतेन सूचिता। सर्वस्मिन्ज्योतिष्टोमाख्ये क्रतावंश्वदाभ्यनामधेयसं
योगालंभादित्यत्रेतरपदसमासपूर्वकनञ्समासांगीकरणेनांश्वदाभ्यनामधेयसंयोगादिति हेतुः पारिशेष्याद्यागविधिसि
द्धौ प्रकृतावेतन्नामकस्य यागस्य ग्रहस्य वा कस्यचिदलाभाद्यागाभ्यासात्मकस्य ग्रहाभ्यासात्मकस्य वा गुणस्य विधिर्न सं
भवतीति प्रकृतौ गुणविधिनिरासार्थो नैतन्नामकः कश्चिद्ग्रहोऽस्तीत्येतावन्मात्रपदार्थस्य यावदुक्तत्वं निरासार्थमित्येवं ता
वत्सर्वपक्षतात्पर्यं व्याख्यास्यन्सूचयितुमाह तद्देवत्वेति। निराकरणमालोच्येत्यध्याहारेण पक्षद्वयनिरासस्य यागांतरश[illegible]ब्देन
यागविधिप्रतिज्ञायां हेतुरंश्वदाभ्यादिवद्ग्रहांश्वदाभ्यशब्दयोर्योगनामत्वे ग्रहनामत्वे वा सति प्रकृतौ यागाभ्यासलक्षण
स्य ग्रहाभ्यासलक्षणस्य वा गुणस्य विधिः स्यात् तस्मादिवद्ग्रहांश्वदाभ्यनामकग्रहप्रसिद्धौ सत्यां यावदुक्तांश्वदाभ्यग्रहणविधिः

स्यात्तदुक्तयात्वारिशेषाख्यानावोद्यागविधिर्वावगतेः यागांतरमेवांश्वदाभ्यसंज्ञकं विधीयत इत्याशयः ॥ अपूर्वेण नाम
धेयेन संयोगादिति नञ्समासपूर्वकोत्तरपदसमासांगीकरणेनुवासंज्ञालक्षणयागांतरत्वपूर्वपक्षहेतुरन्यथैतद्ये दं साध्य
ला घ्यं व्याख्येयमित्याह किं वेति ॥ अंशुर्वा कोयं ज्योतिः प्रकृतेरदाभ्यवा कोपि ग्रहविहितयज्यव्ययायोगेन य जिसामानाधिकरण्या
नुपपत्तेर्यागनामत्वायोगादुपव्ययहेतुवक्ष्यवनार्थे [illegible] किं वृशब्दः स्मिन्पक्षे [illegible] गृह्णात्यव्ययेनग्रहनामत्वाद्यागनामत्वा
योगाशंकानिरासार्थत्वेनन्यग्रहः कश्चिदेतन्नामधेयकोस्तीति वाप्यग्रहणस्य संस्कारत्वेन संज्ञानर्हत्वाद्विधानेथदाभ्यसंज्ञकं
यागं करोतीत्यव्ययप्रतीतेरंशुर्वा कोयंसुसंज्ञकं कर्म करोतीत्युक्ते कित द्वियपेक्षायां गृह्णातिचोदनासामान्याद्गृह्णातेश्चय
गीय इच्छप्रकल्पनार्थत्वावगतेरथ्यकाचोदितद्रव्यज्योतिष्टोमधर्मप्राप्तेरीद्यदेवतालाभाद्यागरूपत्वप्रतीतेर्यागसंज्ञात्वाव
साया क्रियेत्यर्थे क्रियेत्वप्रयोजनाद्यप्रत्ययस्थाउग्रहायातिदेशप्राप्तज्योतिष्टोमिकग्रहणानुवादत्वात् प्रकृतिविशेषद्योत
नार्थं गृह्णातिधयोगोपपत्तेः संज्ञया यागांतरत्वावगतिरित्याशयः ॥ किमित्यादिनस्माद्यागांतरमित्यंत पूर्वपक्षसाध्यं तात्य
र्यतो व्याख्यायनप्रकृतादित्यव्ययवद्गृहपतोद्यावदे नहीति ॥ विध्यंतासावाद्यागांतरविध्यपर्यवसानमाशंक्याह [illegible]

तस्मादिति । लाघवेन द्रव्यदेवताद्वयाक्षेपे यदिच्छेदोपबन्धेन च यागविधिप्रतिबन्धात्सोमदेवत्ययागो गत्वेन यावदुक्तादात्म्य
स्य द्रव्यग्रहणमात्रविधिमस्तु वाक्ये च यज्याक्षेपे तु सत्यं तावत्स्य द्रव्यग्रहणमात्रविधिमाशङ्क्य मास्त्वित्यनेन यच्छेदोपबन्धेपि
प्रत्यभिज्ञानाभावे तु वाद्ययोगादि विधिप्रतीतेर्निरस्तं तदस्तु वाक्यव्यापकत्वादमुकमाशङ्क्य ष्टत्तेति चोदनोपस्थापि
तज्योतिष्टोमधर्मप्राप्तिदेशप्राप्तद्रव्यदेवताद्वयकल्प्ययागप्रामिलक्षणो यः साधारणहेतुव्यापारेण ष्ट्ररयन्यत्र च ष्ठे नवे ति
वत्सालम्भनतुल्यत्वशङ्कोत्तयाद्रव्यश्रवणेपि देवताद्वयमाक्षेपे तिष्ठन्नाद्रव्यदेवतमिति हृद्येकवद्भावच्छेतरेतरयोगाक्षेपे तु सं
र्थं विद्यार्थ्यातं । तस्मादिति यागतत्त्वपूर्वपक्षोपसंहारस्तात्पर्यं व्याचष्टे तापीति । व्याख्यानात् सिद्धान्तमाह इति । ग्रहण
व्यापिष्कृतत्वाद्ध्येनामधेयमात्रविषयतया केवलशब्दव्याख्यानमुक्तेत्याशङ्क्य नामधेयशब्दस्य ग्रहणोपलक्षणार्थत्वं स्प
चयितुं ग्रहणमित्युक्तं । द्रव्यदेवताभावनिमित्तस्य कैवल्यस्याद्रव्यत्वेनैव सिद्धेः केवलशब्दानर्थक्यमाशङ्क्य यावदुक्तं व
व्यापि निरासं केवलशब्दप्रयोजनं स्पष्टयितुं वत्सेत्युक्तं । वत्सालम्भ एव तावद्देवतारहितेन यागाभावाद्व्ययश्चेतानेन
देन्नर्थिनः अश्वदानग्रहणं तु द्रव्यस्याथ भावेन द्रव्यविशिष्टविध्ययोगाद्वत्सालम्भनादपि न्यूनमित्यत इत्यर्थः । ततश्च पूर्वपक्ष

वा
५२

द्रव्यस्याप्ययोगाज्ज्योतिष्टोमारब्धस्य कर्मणोऽभ्यासात्मकोऽवयवोऽत्र विधीयत इत्यर्थ उक्तं। अत्र इष्टेति लाघवादुदाहरणपरि
ग्रहार्थं केवलशब्दापेक्षितत्वकैवल्यनिमित्तोक्त्यर्थोऽद्रव्यत्वादिति सूत्रावयवश्रुतिधान्तिनिवृत्त्यै कर्मशेषस्त्वादिति सूत्राव
यवो न्याय्यासारब्धकर्मावयवत्वश्रुतिज्ञापनाहेत्वन्यथैवं वक्तुमद्रव्यतयेत्युक्तं। नाथ देवतोक्तेरसौ ऽत्र त्वमाशङ्क्या देवताक
त्वस्याभिप्रेतस्यापि स्पष्टत्वात् सूत्रे उक्तिः। अंश्वदाभ्यशब्दयोः क्त द्रव्यवाचित्वशंकानिरासायाद्रव्यत्वोक्तेति सूत्रवृत्त्युत्तमा
ह देवताताविति। सोमायेत्यध्याहृत्वाद्ययागविशेषणत्वायोगात्पष्ठ्याक्षिप्तत्वात्सोमाय गृहीत्वेत्यन्वयप्रतीतेर्यन्न सोम
दाभ्यं नाम जागृविनस्मै ते सोम सोमाय स्वाहेति मंत्रवर्णप्राप्तदेवतानुवादोपपत्तेश्च देवताविधित्वायोगाद्दृष्टवत्ता क्ता। अ
दाभ्यशब्देनावयवव्युत्पत्त्या हिंसारहितदेशान्नहि द्रव्यस्यांश्वशब्देन च निर्यासपद्यापादानोपपत्तेरत्तु पातन्नवोक्तिरयुक्तेत्याशं
क्य नहीत्युक्तं। एवमप्यदाभ्यशब्दवाच्यद्रव्यविशेषाप्रतीतेर्निर्यासस्य च प्रकृतिद्रव्यविशेषाप्रतीतेर्नवित्सालनवद्याव उक्त
द्रव्यविशिष्टग्रहणविधिश्च संभवतीत्याशयः। ननु ज्योतिष्टोमधर्मातिदेशाद्द्रव्यदेवतालाभोपपत्तिरित्याशङ्क्याह नवेति। अनु
यागत्वानवधारणेऽथैंद्रवायवं गृह्णातीत्यादावनिर्दिष्टद्रव्यविशेषस्य ग्रहणाते याग्गीयसोमप्रकल्पनार्थत्वदर्शनेन नाप्य

५२

52

पितादर्थ्यात्तु मानात्वक्तिभूतज्योतिष्टोमोपस्थापकत्वोपपत्तेस्तदीयद्रव्यदेवतालाभोऽलं भविष्यतीत्याशंक्याह नवइ
ह्णातिरिति। द्यु लिंवाराद्भावातु मानेनसंलवतीत्याशयः। केवलनामधेयश्रवणेपि तस्मादेव यागभेदावगतेः कुतो ज्योति
ष्टोमस्यास विधिरिति। शुद्धाया यागनामत्वाभावाद्यागभेदकत्वनिरासार्थमेतन्नावदिति लाघ्यं व्याचष्टे नवेति इति। ऐंद्रवायवं
गृह्णातीत्यादि वद्ग्रहणेनाद्यात्ममंशुं चकुर्यादिति शास्त्रार्थावधारणात् यधिकरण्यान्वयेथैकाधिकरण्यं विनान्वयायोगा
त्सर्वत्र राजपुरुषादौ विप्रराजसंबंधी पुरुष इत्यादि सामानाधिकरण्यान्वयमस्तीत्येत्यग्रहणकारकमदाभ्यमंशुमिति वसा
मानाधिकरण्यं मत्वा ग्रहणसामानाधिकरण्योक्तिः गृह्यमाणग्रहद्रव्यनाम्नोपि ग्रहणनिमित्तत्वोक्तये ग्रहणनामधेयोक्ति
ग्रहणभेदस्तर्हि संज्ञातः स्यादित्याशंक्याह अत एवेति। अंशुशब्दस्य यज्ञ्यत्वयाशंकायोगाद्ग्रहनामत्वस्य तु क्वसंशयत्वं स्या
च्चादद्याख्याय ग्रहणसंस्कार्यत्वाद्यथाशुपद्यादग्रहद्रव्ययागार्थत्वावगतेर्ग्रहभेदाद्यागभेदो भविष्यतीत्याशंकानिरासा
र्थं नवेति लाघ्यं व्याचष्टे नवेति। तद्भेदाकर्मणोस्यास इत्यनेन न्यायेन यागात्यासमाचाद्ग्रहभेदोपपत्तिरित्याशयः। नवइ यैति ला
घ्यमैंद्रवायवं गृह्णातीत्यादौ द्रव्यदेवताश्रवणेपि यजिमत्वस्य निरस्तत्वादनर्थकमाशंक्यातिशयैकत्वार्थत्वेन व्याचष्टे इये

॥५

वा.
५३

53

ति। यदपीत्यादिना ग्रन्थं व्याचष्टे योपीति। गृहीत्वा शब्दार्थे सङ्क्रान्ता विधिशक्तिः प्रत्ययस्थेति समासार्थः। तस्मादित्यधिकर
णार्थोपसंहारस्तात्पर्यं व्याचष्टे तस्मादिति। अत्रैव वाक्ये यज्यस्य कृतेरंशस्य दात्यपशब्दस्यापि मिति द्विवचनायोगं शंकते अंशयोरिति। प
रमतेन तावत्परिहरति यक्षातीति। यक्षाते लौकिकवेदसाधारणत्वेन ज्योतिष्टोमापरस्यापकत्वायोगात्स्वमतेनान्यथा परिहर
ति अस्मे वेति। अदात्यवाक्येपि यजिनानुवादे यागमात्रानुवादापत्तेः सोमेन तु विशिष्टेनानुविशिष्टानुवाददोषापत्तेः
प्रकरणेनैव ज्योतिष्टोमावयवं कृत्तमनयोरिति द्विवचनं। एवं सत्यनारभ्य विधिरनर्थकः स्यादित्याशंक्याह यथेति। कः पुनः पक्ष
त्रयमध्ये सिद्धान्त इत्यपेक्षायामाह तेनेति॥ (५)॥ ॥अग्निकृलिंगदर्शनात्कृतुशब्दः प्रतीयेत॥ ॥अत्रापि शासंगिकत्वेन प्र
कृतयजिमहत्वनावचनत्वचिंतासंगतिमतिदेशत्वेन वानंतरसंगतिमपि शब्देन सूचयितुं संदेहहेतुं विधिमुदाहरणं विवेकपू
र्वकमाह अग्निमिति। यजिमत्वसंस्कारकर्मत्वनिरासार्थो मात्रशब्दः। विनोतिवाक्येन प्रकृतिविकृत्यंगत्वाविधानेपि
नेनवाक्येनाग्निसंस्कारत्वेन चयने विहिते संस्कृतस्याग्नेः केमर्थ्यापेक्षायामुत्तरवाक्ये प्रकृतिविकृत्यर्थत्वे विहिते संस्का
रविधिपर्यवसानमतिप्रेत्य प्रकृतौ संक्रान्तदर्थमेव साध्यकृतार्थपूर्वपक्षोपपादनार्थं चोत्तरवाक्यान्युदाहृतानि। कर्मान्ति

५३

रं चिनुत इत्याख्यातेन विधीयत इत्येतावता चाहवनेन साध्येण यावदुक्तपद्धोनेऽयं विध्यस्य साध्यारूढत्वं । किमिति साध्यं
गुण विधिर्या वदुक्तत्वाख्यपक्षे द्वयप्रतियोगित्वेन व्याचष्टे तद्वेति । अयं खदास्य वैषम्यानुक्ताधिकाशंकादर्शिता । चयननु घुष्
त्वावतः संस्कारमात्रत्वप्रसिद्धेः संस्कारे च । फलश्रुतेरर्थवादत्वस्य वक्ष्यमाणत्वात् कृतस्यापि फलस्यावश्याननुपपन्नेः विषयं
जनत्वस्य संगात्कैवल्यं यावदुक्तत्वं न युक्तमित्यर्थः । अतः पारिशेष्याच्चिनोतेर्यजिमहत्वचनत्वेति कत्तुशब्देनोक्ते तथापि कथं क
र्मान्तरत्वेऽप्यपेक्षायां संज्ञयैवेत्युक्तं । सर्वाधिकरणे सर्वपक्षवदिहापि सर्वनामधेयसंयोगो लेदहेतुरलिप्तेत इति सूचनार्थ एवका
रः । अग्निसंज्ञकं कर्म करोति । तिष्टकालिरग्निं चिनुत इति वाक्यान्तरविहितचयनानुवादित्वात् यागग्रहार्थं चिनोतिधातूपरेण प्रत्य
येन विहिते किं तदित्यपेक्षिते भिमत्तुयजतीत्युत्तरवाक्ये यजिसामानाधिकरण्याद्यागरूपतावसीयत इत्याशयः । गुणविधित्व नि
रासेन यजिमहत्वचनस्योपपादनार्थं चयं तावल्लिङ्गदर्शनमाह तथा चेति । ननु गुणविधित्वेपि चयनसंस्कृताग्निलक्षणस्य गुणस्य
फलश्रुतिर्युक्तेत्याशंक्याह नचेति । भाष्योक्तं लिंगदर्शनं व्याचष्टे तथा चेति । नाग्निरिति साध्येनाग्निशब्देन यागनामधेयत्वेऽनपेक्षे
ष्यातोऽग्निमग्निष्टोमेनैवानुयजति तमुक्थ्येन तं षोडशिना तमतिरात्रेण तं द्विरात्रेण तं त्रिरात्रेण तं चतूरात्रेण तं पंचरात्रेण तं षड्रात्रेणेति

ले

सप्तरात्रेणैतमष्टरात्रेणैतं नवरात्रेणैतं दशरात्रेणैतमेकादशरात्रेणेति वाक्यस्य ज्ञापकत्वेनार्थमत्रेति भाष्यं व्याचष्टे तथेति
अस्य ज्ञापकत्वोपपादनार्थं यागमिति भाष्यं द्वेधा व्याचष्टे तत्रेति। अथैत्यादिनैकादशरात्रेणेत्यंतेन वाक्येनेत्थंभूतलक्षणतृतीया
युक्तयजतिशब्दानुषंगेण वैकल्पिकाग्निष्टोमादिसंस्थाद्विरात्रादिकालविशिष्टं विधायाग्नियागं करोतीति सामानाधिकरण्या
द्धृदाहवनीये जुहोतीतिवत्त्वव्याख्या द्वयशास्त्राद्याग्निशब्दस्य गुणविधित्वानुपपत्तेर्यागनामत्वावसायादग्निसंज्ञकं यागं करोतीति
चिनोतिवाक्यार्थो गृह्यत इत्याद्यव्याख्यानेऽस्य भाष्यार्थः वाक्यांतरेणैव नामादिविशिष्टयागविधौ चयनवाक्यानर्थक्यापत्तेर्वाक्यस्य
वृत्तिवेलायां वानिश्चितार्थस्यापि चयनवाक्यस्यार्थं वक्ष्यतीति रित्यादिवदस्य तादर्थ्यनिश्चयसंभवे विधायकत्वोपपत्तेराद्यव्याख्या
नापरितोषाद्द्वितीयव्याख्यानेऽथेत्यादिषु संस्थाद्यर्थविधिपरेष्वितरेषु वाक्येष्वग्नियागं करोतीत्यग्निशब्दस्य सामानाधिकरण्येन यज
तुनादाद्यर्थत्वानुपपत्त्याग्निसंज्ञया यागविधायित्वं चिनोतिवाक्यस्यावसीयत इति भाष्यार्थः एकस्मिन्गुणपरे वाक्येऽनेकार्थवि
धियोगात्संस्थादिविधिपरे वाक्ये इत्येकवचनं सामान्याभिप्रायं। तस्मादित्युपपादितोऽन्वयः तं भाष्यं व्याचष्टे तस्मादिति। अत्र शब्दा
दग्निशब्दस्य यागवाचित्वमवगम्यत इत्युक्तार्थमत्र शब्दोऽपीति भाष्यमपि द्वेधा व्याचष्टे अत्र शब्दश्चेति। संस्थादिविधिपरेऽत्र वा

कोऽयं तु शब्दोऽनेकस्य प्रख्याद्वा वश्यविधिप्रयोगेनानुवाद्यत्वावगतेर्यागत्वे च प्रख्याद्वा वाधातेरनुवादायोगाद्यागताग्नेर्ज्योयत
स्याद्यव्याख्यानेऽसाधार्थश्च द्वितीये त्वग्निष्टोमादिसंस्थैरेकाहैर्द्विरात्रादिभिश्चाहीनैरग्नेश्च प्रख्याक्र रिष्टमाग्नेरग्निरनुयष्टव्य
स्त्य ग्नेर्यागप्राप्तावमात्रेण विधानस्य तुल्यरूपत्वागमकत्वाद्यागत्वावगतिरिति। अस्मिंश्च पदे व्याख्याने विनोतिवाक्य विहित
स्य यागस्योक्तरवाक्यैः संस्थाद्यर्थत्वविधानुपगमादग्निसंस्थाया यागश्च निष्फलत्वेन शेषित्वायोगादग्निष्टोमशब्दस्य तत्संस्थयागवाचि
त्वात्सर्वार्थितासिद्धौ वा तु शब्दस्य सर्वत्रानुषंगं सिद्धांतवत्पक्षं दर्शयितुं यागैरित्युक्तं। अथ देवतादीनि कर्त्तव्यानि नाम्नानाद्यागविध्य
निर्वाहाशंकानिरस्य तस्मादिति पूर्वपक्षोपसंहारस्तात्पर्यं व्याचष्टे तस्मादिति। एतदुक्तं भवति विनोतिवाक्यपरात्पूर्वं तद् विनोतिवाक्ये
न यागविधावुक्तरवाक्यानां संस्थाद्यर्थपरत्वाभ्युपगमान्यो वा विवक्ष्य विधाविधिवानुपपन्नेति द्वितीयव्याख्यानेऽनुक्तेत्याशंक्याग्नेर
ग्निष्टोमाद्यंगत्वं प्रसिद्धिनिर्वाहार्थं द्वितीयव्याख्यायाः पौर्वापर्यमात्रश्रवणेन विधिं न दर्शयितुं पौर्वापर्यविधिनैवांग
तासिद्धिर्न तु संस्थाद्यर्थविधितश्चेति सूचयितुमाह पाश्चिमेविति। शंकानिरासार्थक्रमशब्दः। अग्निष्टोमाद्यर्थं क्रियमाण
त्वेनाग्नेराग्निष्टोमाद्यंगत्वे सिहिते तदर्थं क्रियमाणत्वे वक्तव्यमित्यपेक्षिते गः। यत्तद्देवनानुगं तस्य इति विधिनो यत्तद्देवस्यप
कैमर्थ्यापेक्षायामग्निष्टोमादिनाग्नेरनुयष्टव्यत्वविधितो देवदत्तो

वा. ५५

स्वाङ्गमनश्नातीतिवत्फलवतोग्निष्टोमादेः पश्चाद्भावितयाऽऽहुतीनस्यातिक्रमकारणाभावान्नदृश्यन्तेवोचितेतिसूत्रयितुं पश्चा
द्भाविस्यैः तत्रुक्ताः पूर्वव्याख्यानेतु पौर्वापर्यस्याविधेयत्वान्नदृष्टेनज्योतिष्टोमांगत्वाऽऽहुतीनांः स्वतंत्रतेत्याशयः ॥ ॥इष्टंवास्य
वोदनायाः स्वदर्थत्वात् ॥ ॥इष्ट्यंवेत्यादिः शसिद्धइत्यंतंसाध्यंतात्पर्यतश्चावद्याचष्टेआज्यएतेति ॥ श्लोकंव्याचष्टेनहीति ॥ पूर्व
पक्षेतंतन्त्रत्वमनुराघ्नणः शंपरिहरतियद्यपीति ॥ यदियदाहवनीयेजुहोतीतिवत्तुहोमः क्रत्वंगत्वेनाथेत्यादिवाक्यैर्वि
धीयेततत्तत्स्वतन्त्रत्वंलवेत्स्वाहवनीयवाक्यात्तुहुतः श्रामक्रत्वंगत्वावएवचिनोतिवाकूपावयनसंस्कार्यतयाक्रतोथत्या
दिवाक्यैर्विधीयमादङ्गेवक्रत्वंगत्वेनविधीयतेतादृशेणवाच्यतेश्रामेन्नंतन्त्रत्वंयतेत्यर्थः ॥ श्लोकार्थमुपसंहरतितस्मादिति ॥
एतदेवसाध्यमवयवशोव्याचिख्यासुः कृतमदितिप्रश्नसाध्यमग्निशब्दार्थस्यसर्वलोकप्रसिद्धेरयुक्तमाशंक्योपपादयतिकृत
मदिति ॥ योगनामत्वेग्निशब्दस्यैष्टकाचितिरग्निश्चितुतइतिवाक्यांतरेणतदंगतयावयनविधेरंगाग्निनोरसदोपचारेणाग्नित्व
यनंकरोतीतिसामानाधिकरण्यसंलविष्यतीत्याशयः ॥ यदीत्यन्तरसाध्यांशमाहसिद्धातेति ॥ वादना
याइतिसूत्रावयवव्याख्यातार्थंचितुतइतिसाध्यमुपपादयति ॥ तस्मादितिवा

५५

55

यद्यंश्वेतमालभेतेत्यादेर्यागविधानाशङ्कावपियागचोदनास्वरूपगमान्नहेयत्वार्थइत्येतदुक्तं।उपपन्नंत्वन्तरमाहतथा
वेति।यावद्युयजतिशब्दादग्नेर्यागतोक्तातत्परिहारार्थमनुशब्दस्येत्यादिनाध्यमाशंकान्तुलाघवेणश्र्वंद्यावदेवत्वेति।नान्वय
जतिशब्देनाग्नेरग्निष्टोमादिलिखेद्युयष्टव्यतोच्यतेकिंत्वग्निष्टोमादिशब्दसामानाधिकरण्यादेकाहग्राहीद्विरात्रादिशब्दसामा
नाधिकरण्याद्वाहीनग्राहीयजिशब्दस्ववाचिशब्दालाभादग्निष्टोमादिसंस्थासद्भावमात्रेणस्वसन्नियहणेऽहीनानामपितथै
वाग्रहणसिद्धेर्द्विरात्रादिनाक्यानर्थक्यापत्तेः।सत्यांहित्वकथमितिनविद्मः।वयनसंस्कृतस्याग्नेरेकाहाद्यंगत्वोक्त्येतु
शब्दस्तुत्तरार्द्धार्थःश्लोकार्थमुपपादयितुमाहयदिहीति।यदग्निष्टोमादिरितियागेकुर्यात्तदग्निमचितित्यधिकरणेनाग्निशब्द
स्ययजिसामानाधिकरण्याभावान्नऽःस्वेनयागत्वाविकल्पनायुक्तेत्फलकेन्वस्यसामानाधिकरण्याभावेपिद्वितीयोक्ताउ
यजनकर्मत्वान्वयस्तावदुपपन्नाग्नेर्यागत्वंकल्प्यायिष्यतइत्याशंक्ययदिवेत्युक्तं।अग्निचयनस्याग्निष्टोमादिकालत्वलक्षणेकार्य
त्वेनानुशब्दस्यानुर्लक्षणइतिकर्मप्रवचनीयसंज्ञत्वात्कर्मप्रवचनीययुक्तेद्वितीयेतिस्मृतेस्तद्योगानिमित्तवात्र्द्वितीया
कर्मणीत्यर्थः।लक्षणार्थतानुशब्दस्यतत्रेत्यनेनोक्ता।विनोत्पत्तेरग्निचयनमाश्रित्यर्थालाभसमाशंक्याग्निशब्दस्येत्युक्तं।श्लो

कार्थमुपसंहरति। तेन कर्तव्यं गत्वा वेति। तृतीयेऽप्यन्तुः शतलक्षणे। अग्निमग्निष्टोमेनैवानुयजतीत्यग्निष्टोमाख्यप्रकृत्यङ्गत्वे विहिते ति
देशे नैवोक्थ्यादिषामेष्वमु उक्थ्येनेत्यादेः प्रत्यर्थानुवादत्वेनैकवाक्यत्वावगमाद्बहुवचनानुपपत्तिमाशंक्य ते चोदकेनैवाति
देशमेव एवं विद्वानग्निं चिन्वीत इति वाक्यविहितमग्निमुपदिश्य संवत्सरं वा एतद्यज्ञं उख्यं दत्तियात्याद्या इति वाक्यविहितमातियात्या
नुदाहृत्यामातियात्र्यं विकृतावतिदिश्य तेन वेति संदिग्धेऽग्न्यतियात्यग्नौ विकृतावुपदेशादग्रहणं निःश्रयादिति सूत्रेणामेष्व
मुक्थ्येनेत्यादिनातिग्रात्याणां वय उक्थ्यमिति गृहीतीयादित्यादिना काम्यविहितातिक्रमपदेशा दतिदेशाग्रहणं शिष्वेष्वपक्षयिचा
तिदेशमुख्यापर्यायग्रहणेः सर्वाङ्गतुल्यत्वादग्न्यतियात्यख्यापि ग्रहणमिति याग्नख्यापि ग्रहणमिति ग्रहणं वाऽतुल्यत्वादि
त्यनेन सिद्धान्तेति विकृतौ तत्र्यपदेशः किमर्थ इत्याशंक्यातिदेशगृहीतस्यापि काम्यविहितस्य पदेशे न ग्रहणे गुणक
मग्रहणार्थं समानविधानत्वं प्रयोजनमिति ग्रहणे समानविधाने स्यादित्यनेन वक्ष्यमाणत्वेनाप्रतीयमानकृत्यर्थत्वक।
ल्पनायोगाद्बहुवचनानीति बहुवचनोपपत्तिरिति परिहरति दशमइति। कर्मण्यपि द्वितीयायां क्रियावज्जात्यपेक्षया तुश
ब्दस्य युजिविशेषणत्वोपपत्तेस्वांतरजातितुल्यत्वानावश्यकत्वानानुयजनकर्मत्वमात्रेणाग्नेर्यागरूपत्वावगतिरित्याह

नचेति। सर्वपक्षोक्तदूषणानानुत्साधयन् सर्ववैषम्यमाह यद्वेति। किंचिदकुर्वतो देवदत्तस्य यज्ञदत्तकर्तृकागमनसंकर्मसं
योगाद्वितीयोक्तकर्मत्वापादनाद्वितीयोक्तकर्मत्वं यथा उपपन्नाकर्तृत्वमात्रोपादाने सति क्रियांतरानुपादानात्तुल्यक्रि
याकल्पनं युक्तं वचनसंस्कृताग्निविशिष्टेन वचनाख्यक्रियांतरोपादानान्न उत्पक्रियाकल्पनायुक्तेत्यर्थः॥
तत्संयोगात्क्रतुसदाख्यः स्थानेन धर्मविधानानि॥ ॥अग्नेः स्तोत्रमित्यादावग्निशब्दवाच्यवचनसंस्कृतज्वलनाख्यद्रव्यसंयो
गालक्षणया स्थाख्यः क्रतुस्थानेन कारणेनाग्नेः स्तोत्रादिधर्मविधानात्युपपद्यंते इत्येवं सर्वपक्षोक्तलिंगपरिहारार्थत्वेन स्वचथा
ख्यानार्थयन्नित्यादिना ग्रंथतात्पर्यतो व्याचष्टे अग्नेरिति। अग्निसंयोगाद्यागलक्षणायां यागमात्रप्रसक्तिमाशंक्य विशे
षणं यज्ञार्थे कृतं तद्व्याचष्टे ज्वलनेनेति। व्याख्येयसाध्यानुसारादग्निशब्दस्येति सर्वस्य वस्थवार्तिकालोचनया च ज्वलनसामा
नस्थापनसंस्कृतो विशेषो लक्ष्यत इत्यर्थः। वेतसशाखयावकाभिस्थापयंविकर्षतीत्यादौ चाग्निस्थापनात्वाक्ययोगादग्निश
ब्दस्य स्थललक्षणार्थत्वं युक्तं। तत्र षवेत्येवकारार्थमाह नचेति। ताच्यकारांतरकृतानि चिंतांतराणि कस्मान्नानेन साध्यकृता
दर्शितानीत्याशंक्याह यच्चेति। फलवदफलवन्नित्यानित्यवद्विचारो पर्णमय्या घृतादाहरणेऽपुपर्णमय्यधिकरणसिद्धो। शाक

वा. ५७

तवैकत्वविचारस्थास्मिन्नेवोदाहरिष्यतिगत्याधिकरणसिद्धं ४। उत्तरवेदिविकाराविकारविचारकृद्गोदोहनोदाहरणे काम्या
गुणेनित्यमर्थं विकरोतीति कृत्वादनानैमित्तिकं उधकृतौ न तद्विकारः संयोगविशेषादिति तृतीयाधिकरणसिद्धं ५ सं कार्ये
द्वितीयेध्यायेमध्यमायाउपसद्यग्निश्चीयते प्रकृतउपकृत तद्वादित्यत्राधिकरणे मध्यमायाउपसद्यग्निचयनसिद्धौ किं चितावोत्त
रवेदिकाधर्माः कार्या न वेति संदिग्ध्याग्न्युत्तरवेद्योः समुच्चयाच्छिन्नकार्यत्वावगमेनाग्नेरुत्तरवेदिकार्यापन्नत्वावगतेरोत्त
रवेदिकधर्मा न तिदेशः सर्वपत्न्यधिद्वासोत्तरवेदिक्रतुं विधीतोत्तरवेद्यात्यग्निश्चीयत इति वचनालोचनया समुच्चयावगमे
पिचयनतिष्पादितस्य स्थलस्याग्निचित इति द्वितीयोक्ताग्निसंस्कारार्थत्वस्योत्तयाग्निधारणात्मकसंस्कारार्थत्वावगमेनो
त्तरवेद्यामग्निं निदधातीत्याग्निधारणार्थोत्तरवेदिकार्यापत्त्यवगमात्कार्यैक्येपि सर्वेवद्यां हवींष्यासादयति बर्हिषि हवींष्यासाद
यंतिवेदिवर्हिषोरिवस्थलोत्तरवेद्योरपि पाक्षिकप्राप्यत्वेन विध्येत्तावानियमदृष्टोच्चनैरपेक्ष्यानवगतेः समुच्चयाविरोधा
उत्तरवेदिकार्यापन्नास्थलाख्यश्चायने सद्धर्मातिदेशः सिद्धांतयितुमुत्तरवेद्यासमुच्चीयमानेपिचयने उत्तरवेदिकार्यापन्न
उत्तरवेदिधर्माः लवेसु शितिवदतात वत्यत्नाष्टकृतोत्तरवेदिकधर्मग्राहित्वलक्षणस्य तद्विकारत्वाद्यात तद्विकारत्वमसर्वपन्न नि

तीर३

रासमर्थत्वमुपपादयिष्यमाणत्वात्सिद्धवत्त्वसमुच्चयोक्त्या बाधरूपतद्धिकारत्वनिरासेनाबाधरूपस्यातद्धिकारत्वस्य वक्ष्यमाणत्वा
त्तदधिकरणसिद्धः। न केवलं गतार्थत्वाडपेक्ष्यः। किंत्वसंगतत्वादपीतीहेत्यनेनोक्तं। कस्मान्न हि तेन कृतमित्यपेक्षायामुपहासार्थं स्म
रणेत्युक्तं। प्रासंगिकमधिकरणद्वयं समाप्य प्रकरणार्थमुपसंहरति तस्मादिति। पूर्वत्र संस्रवीदध्यादिर्न्नेदमित्यर्थः॥ २५॥ प्रकरणा
न्तरे प्रयोजनान्यत्वं॥ ॥प्रकरणान्तरविचारस्यानन्तरासंगतिमाशंक्याह गतमिति। प्रासंगिकचिंतावदपवादचिंतापि प्रकृतान्यत्ववधा
यिकेति सूचयितुमपवादः प्रसक्तत्वेनोपवर्णितः। तेन चिंतयापि प्रकरणान्तरचिंतायाः संगत्यभावमाशंक्य भेदकान्तरस्यावाच्यत्वा
त्पारिशेषिकी संगतिः पंचस्वित्यनेनोक्ता। पूर्वपक्षमाह तच्च तावदिति। दर्शपूर्णमाससवैश्वदेववरुणप्रघाससाकमेधशुनासीरीय
प्यादिशब्देन गृहीतानि। प्रयोकार्थमुपपादयति यथैवेति। नाप्येकालविधिफलैः प्रयोजनमाह नवेति। नत्वनित्याग्निहोत्रे दर्शपूर्णमास
योस्त्व जीवनस्य निमित्ततयाश्रये तावत्कालमनुष्ठेयत्वावगतेर्जीवनावधिकारो धान्नैमित्तिविधिर्न संभवतीत्याशंक्याह नवेति। अप्र
करणाधीतस्यापि मासस्य सान्नाकर्म्मोद्वयविधेः प्रकरणाधीतेऽनकालेन तुल्यबलत्वाविरोधमभ्युपगम्यातुल्यकल्पत्वेनातु
ल्यबलत्वाशंकानिरासायातुल्यकल्पजरावधिविशिष्टपरिमितकालान्तरपरामर्शीयादिशब्दः। जीर्णस्यापि सहायोपादाने

प ३ ला ३

वा.
५८
58

योऽप्याधानेनानुष्ठातुं शक्तस्य जीवनावधिः कालो सहायस्य जरावधिः विरक्तस्य प्रव्रजितो ऽस्त्रिंशद्वर्षपरिमित इति जीवनादि
कालानां त्र्यवस्थितविकल्पवदत्यंतविरक्तस्य शीघ्रं प्रव्रजितो ऽर्मासो ऽपि त्र्यवस्थितविषयतया विधातुं शक्य इत्याशयः ॥
काम्यप्रयोगस्य वासायंप्रातः कालावगमे ऽपि सायंप्रातर्मासं जुहुयादित्यत्र प्रयोगपद्धतेर्विशेषिकालांतरानवगमान्नासविधि
त्वविषयतीत्यप्रयत्न्यापरिहरति यावेति। नन्विति राध्येणमासविधेर्नित्याग्निहोत्रविषयत्वे प्रकरणबाधदोषमाशंक्य कामित्यनेन न
परिहृतं तद्व्याचष्टे प्रकरणस्येति। प्रकरणानुग्रहार्थं दीक्षितो न ददाति न जुहोति न पचतीत्यग्निहोत्रादीनां पर्युदस्तानां प्रतिष
सवो ऽयमिति पक्षांतरमाह अथवेति। दीक्षितस्य दानहोमपाकप्रतिषेधे विशेषात्सर्वपाकदानहोमप्रतिषेधः स्यादिति दर्शमाधि
करणे ऽपि तु वाक्यशेषत्वादित्यत्र पर्युदासः स्यात्प्रतिषेधे विकल्पः स्यादिति सिद्धांतसूत्रेण पर्युदासत्ववक्ष्यमाणत्वात्प्रतिषेधो
क्तिः पर्युदासलक्षणार्थाः एवमपि प्रकरणानुग्रहः कथमित्याशंक्याह समवेति। को ऽपायिन प्रयोगे प्रतिप्रसवं करणात्प्रकरणपा
ठोयुक्त इत्याशयः अस्मिन्पक्षे प्रकरणपाठोपपन्नावपि तद्व्यापारात्तावात्प्रकरणानुग्रहेण परितोषाभिद्धातेवाग्निहोत्रादि
ज्ञानां प्रत्यासपरिमितानां प्रत्यांकर्मांतराणां प्रत्यासपरिमितसोमयागसहितानां संवत्सरपरिमितसत्रप्रयोगवचनेन फलवि

५८

ध्विभ्रूवचनार्थं ध्रुमतमाह अथवेति। नचाग्न्यसाहित्यमात्रेणान्यत्वापत्तिरित्याह नहीति। नत्ववगतफलस्याग्निहोत्रादेर्नैराकांक्ष्या
त्फलांतरान्वयाद्युपपत्तेः फलांतरान्वयादेवान्यतोपपत्स्यत इत्याशंक्याह नवेति। नतु कर्मणस्वप्रवृत्तिशादित्यत्र करणस्य कृत्वं
तरगमननिषेधान्नश्चर्वस्याग्निहोत्रादेः कौंडपायिनां तः पातोयुक्त इत्याशंक्याह नवेति। अतिदेशतश्च क्रत्वंतरान्वयविरोधेपि उप
देशतोऽन्वयाविरोधः स्वशाहगिरोक्तः सर्वपक्षमुपसंहरति तस्मादिति यथा तादर्थ्यसिद्धांतेऽष्टपशीष्टमुपन्यस्यति इतीति। पूर्वत्रासंलग्न
पसल्लक्षणगुणरूपेण हेतुनाभिन्नतेत्यर्थः आकंक्ष्यावशेष यदि हीति। स्वार्थोपसदलाभेपि पशंवगपरिक्षिप्रहरणस्य हारियोजनकाल
लक्षकत्ववत्परार्थानामप्युपसदां अग्निहोत्रादिकाललक्षकत्वोपपत्तिमाशंक्य परार्थत्वेप्युक्तो हारियोजनस्य ज्योतिष्टोमावयव
त्वात्परिक्षिप्रहरणस्य च पशुद्वारा ज्योतिष्टोमांगत्वादेकप्रयोगवचनग्रहणाद्युक्तं काललक्षकत्वं न त्विहैकप्रयोगवचनग्रहण
मस्तीत्याशयः एकप्रयोगवचनग्रहणाभावेपि दर्शपूर्णमासयोः सोमकाललक्षकत्ववदुपपत्त्याशंकानिरासस्य चनार्थो वाश
ब्दः कृतदर्शपूर्णमासस्य सोमाधिकारप्रतिपत्त्यर्थं काललक्षणमुक्ता उपसदां तु क्रत्वंतरमध्यपातित्वात्क्रत्वंतरप्रयोगनिषे
धाद् अग्निहोत्राद्यधिकारप्रतिपत्त्यर्थकाललक्षणार्थत्वाद्युपपत्तेः क्रमप्रतिपत्त्यर्थालक्षणावाच्यानचाभिन्नप्रयोगवचनगृहीता

म५

मध्ये वक्र्यंतर२

नांक्रमोऽस्तीत्याशयः । तादृत्यनेनाग्निहोत्राद्यंगत्वेनोपसंहितविधिरसिद्धेतः प्रतिप्रसवेऽग्निहोत्राद्यंगत्वाविधेः सचैकदेशत्वेनो
पसदुत्तरकालत्वस्यापि सोमयागवत्सामेर विधानान्न वाक्यभेदोऽस्तीत्याशंक्याह एतस्मादेवेति । अंगत्वाविधाने तूपसदुत्तर
कालत्वस्य प्रतिप्रसवेऽवश्यविधेयत्वान्निर्ज्ञातसायंकालत्वेन च सत्त्वोपाधिककालग्रहणात्सचैकदेशत्वेपि विधेयत्वाद्वाग
तेर्वाक्यभेदोपरिहार्य इत्याशयः । कर्मांतरत्वेपि तर्हि नामातिदेशतो निर्ज्ञातकालत्वान्न तस्य प्रयोगवचनाद्बलीयस्त्वात्का
दपि बलीयस्त्वेन सत्प्रयोगवचनगत्योपसदुत्तरकालत्वग्रहणादनेकार्थविधिः स्यादित्याशंक्याह कर्मांतरेति । उपसं
हरतीति तस्मादिति । इष्टयित्वमारंभते इदं त्विति । वाक्यभेदापत्त्या प्रसिद्धभेदकांतरापत्तिदोषपरिहितेर्वाक्यभेदो कथ्यावोदिते हि
तदर्थवाक्यस्य तत्स्योपदिश्यते इत्यनेन गुणस्यानेकात्मकत्वनिमित्तस्वर्वजातां च लक्षणभेदकत्वहेत्वर्क्तेर्न भेदकांतरापत्तिरि
त्याशंक्याह अवेत्सुक्त्वा । प्रकरणांतरानवकाशमुपपादयति तथा हीति । दर्शपूर्णमासाद्युदाहरणाद्व्यापकत्वादपि न वाक्यभे
दो भेदहेतुरित्याह किं चेति । स चैकदेशत्वेनाग्निहोत्रादिविधावुपसदुत्तरकालसोमयागरूपसत्त्वैकदेशसाहचर्येणाग्निहो
त्रादेरपि सत्त्वैकदेशस्य तदुत्तरकालयामेऽग्निहोत्रेपि वाक्यभेदस्य शक्यपरिहारत्वं चेच्छोल्या स्ववितं । श्लोकं व्याचष्टे मासमि

तिा नचोपसदोग्निहोत्रस्य दर्शपूर्णमासयोश्चेति तस्य तस्य पर्यालोचनमात्रेणानुषंगमाशंक्यते नचेति । निरस्यति । तदिति
श्लोकं व्याचष्टे नचेति । अनुषंगवादिनमुपसंहरति यद्यपीति । उपहासाद्वंधयति वेदानन्तुज्ञानोपसदा इष्टद्युनौ वित्यादिनिष्टापयि
माह नत्वित्विति । क्वा अन्त्य यच्च पूर्वकालतामाच्चवाविद्वादग्निहोत्रान्त्यादुक्तानामुपसदां दर्शपूर्णमासादिपूर्वकालत्वोप
पत्तेर्वानुषंगेण इष्टद्युपत्तिरित्याशंकते । अथेति । सर्वज्ञानुषंगस्य यत्प्रयोजनं सर्वेत्यपक्षप्रागनुष्ठानं तत्संपादनमित्य
र्थः । शाखोच्चारणमपि तदूपसदः संदेवास्थितं सदनुषंगवे लक्ष्यं सर्वेषामग्निहोत्रादीनामुपसदुत्तरकालबोधनेन
णानुपकारं करिष्यतीत्यनुषंगानर्थक्यमिति परिहरति । तथा सतीति कथमित्यपेक्षायां पाठक्रमानुरोधेनेतरेषाम
ग्निहोत्रोत्तरकालतोक्ता । यथा त्वाष्ट्रं सिद्धांतव्याख्यायामेषामुपसंहरति तस्मादिति । स्वमतेन सिद्धांतयितुमुपक्रमते अन्ती
ति । श्लोकं व्याख्याय श्रुत्स्नकरणान्तरोक्तिं तावत्प्रत्यक्षश्रुतिविच्छेदाशयवेन व्याख्यातुमाह इह तावदिति । अनुपादेया द्येव क
र्मणो विधेयतायासेदहेतुवद्ध्यासिद्धावस्थवाक्येनापीत्यनवक्लृप्तिः । अतिरात्र इत्यादौ विप्रतिपत्तिसज्ञावेद्यकरणा
न्तरस्यापेक्षावर्थेदकत्वात्तावात्स्वकरणान्तरसदस्यनुयोगात्यर्थः । प्रकरणान्तरोक्तेः स्वप्रकृतेरुच्छिद्दोदाशयतेनैरव्या

यस्त्वेष्वपि स्थित इत्याह तथा चेति । श्लोकं व्याख्यातुमुपक्रमते सर्वत्रेति । व्याचष्टे तत्रेति । प्रदेशान्तरस्थे कर्म्मणि शामि
त्रवह्नित्वादुपादेयत्वापत्तेरित्याशङ्क्य विधित्वाशङ्कोद्देशोक्त्या निरस्यति । स्थलावतः शामित्रवह्नित्वेपि एकोद्देशेनत
रोपादानं विनान्वयायोगादुपपद्यते कर्म्मानुवादत्वाकाङ्क्षणाद्युक्तमिति तदाहवनीय इत्युद्देशात् शामित्रवह्निः संल
वतीत्याशयः शय स्मिन्देशे काले वा कर्म्म विकीर्षितं तस्मिन्देशाद्यनुपादेयं चक्षुषापादयितुमशक्यत्वादुद्देशाद्यन्वये तदु
द्देशेनैव कर्म्म विधेयमित्युक्तं तथाप्यस्यार्थेन विधेयत्वात्समादिविधिवन्न कर्म्मभेदापत्तिरित्याशङ्क्य परोद्देशेन चेत्युक्तं
समादावपि विधिसामर्थ्यात्कर्म्मान्तरबुद्धिर्भवन्ती बलीयस्या विपरिहृत्यावार्य्यते तदत्वावेतु विशिष्टविध्युपपत्तेर्नुर्गेदबु
द्धिं बाधितुमुक्तेत्याशयः । एतदेव रूपकोक्त्या विवृणोति एवं हीति । सामान्यस्यायमुक्त्वा घटते योजयति तादृहेति । स
न्निधेर्यदित्नयोगलक्षणस्यवोद्देशस्य शामित्रबुद्धिहेतोरत्वावेपि नामधेयात्सामित्रबुद्धिर्न विष्ठतीत्याशङ्कते ननु चेति । ननु
नाम्नापूर्वकर्म्मणि बुद्धिरुत्पद्यते पि नामैकयस्यार्थे क्यानेकान्तिकत्वेन तदेवेदमिति प्रत्यभिज्ञानाभावान्नोत्पत्तिः । प्रतिब
न्धुं शक्येत्याशङ्क्याह तत्रेति । बुद्धिस्थत्वेपि प्रत्यभिज्ञानानभ्युपगमे सन्निधाने प्रत्यभिज्ञानानुपपत्तेर्बुद्धिस्थत्वमा

ज्ञेण प्रत्यभिज्ञायाः वक्ष्यत्वान्नामापि प्रत्यभिज्ञाहेतुत्वादुत्पन्नं प्रतिबध्नातीत्याशयः ॥ अयं तत्र नाम्नोपस्थापनयनशक्ति
रस्तीति तत्रेत्यनेन परामृष्टं (तत्र वर्थं) विवृणोति यद्वेति। सन्निधेस्त्वावश्यकत्वेऽपि विलक्षणकर्मोपस्थापकत्वात्प्रत्यभि
ज्ञायुक्तेति हेतुतापरिहर्तुमारभते उच्यत इति। श्लोकं व्याचष्टे सन्निधाने नहीति। नाम्नः पूर्वकर्मोपस्थापकत्वस्य पूर्व
कर्मत्वावच्छिन्ननिमित्तकत्वादाख्यातस्य च पूर्वकर्मविषयत्वं विना नाम्नः पूर्वकर्मवाचित्वानवधारणात्पूर्वकर्मोपस्था
पकत्वानुपपत्तेर्नेत्यग्निनिश्चितिबंधकत्वं संभवतीति परिहरति नामधेयं त्विति अस्यपेत्यास्त्वुपस्थापकत्वेऽभावनावा
चित्वाभावान्नोपस्थापकत्वं न संभवतीत्याह किंचेति। श्लोकं व्याचष्टे सामानाधिकरण्ये नहीति। वाक्यार्थत्वात्प्रधानभू
तभावनाप्रयोजनशब्देनोक्तेति सूचनायेतीत्युक्तं। परमार्थतस्त्वैवं लक्षणत्याद्दृत्त्वर्थोपिनोपस्थाप्यत इत्याह अथवेति।
नाम्नाख्यातोक्तरूपात्तदुपस्थापनेऽपि नित्याग्निहोत्रविधिस्थनाम्ना काम्यस्य तत्स्वरूपस्योपस्थापनं संभवतीत्याशंक्याविधि
विषयीकृतस्य रूपस्योपस्थापनीयत्वान्नाम्नो वार्थाधिकरणन्यायेन तद्भावत्वं यथाविधिना विधिविषयीकरणान्न नाम्नोपस्था
पनं संभवतीत्येवं निरस्य श्लोकं व्याचष्टे असत्वेति। इत्यशब्देन सर्वशब्दं निष्पन्नरूपवाचितया व्याख्याय तदुपपादनार्थं लि

व

६ यीकृतायानाम्नानुपस्थापनात्प्रकरणांतरेणभेदसिद्ध्यर्थत्वात्प्रकरणांतरोत्पत्त्यर्थत्वशंकानिरासार्थं जावत्भावेत्युक्तं । शुक्त्यानावनायाविधिविधि

वा गेत्युक्तं ॥ लिंगसंख्यावाचिन्याश्च पश्चातिपदिकपरत्वस्मृते स्तयच प्रातिपदिकार्थश्च सत्तेति सत्ववाचित्वस्मृतेर्लिंग

६१ संख्यात्वयाईत्वेन प्रातिपदिकत्वात्सत्त्वाभावावितेत्याशयश्च तत्व सत्वभूतस्य धात्वर्थस्य धातुना विधिविषयीकृतस्य नाम्ना

नुपस्थानापत्त्वे देल्फपुगम्यमानेतिराद्रयस्य उर्विशइत्यादाव्याख्याताक्रतेरसत्वभूतधात्वर्थात्पादानात्सत्वभूतस्यैवधात्व

61 र्थस्याति राद्रश्चकार्यश्च उर्विशश्च कार्य इत्यादि विधिपदाध्याहारेण नाम्ना विधिविषयीकृतस्य प्रकरणांतरे विनामोप

स्थानसंभवादकर्मांतरत्वापत्तेश्च प्रकरणांतरोक्तिरनर्थिका स्यादित्याशंक्याल्फपगमेन तावत्परिहरति यत्विति ॥

अवद्यंतीत्यादाव्याख्यातक्रतावसत्वभूता तावनाया विधिविषयत्वायोगान्नदउरंजकस्य त्वया गार्थस्यवारुणेनै

ककपालेनावभृथं यंतीति वारुणशब्दोक्तइज्यदेवताव यज्ञकल्प्येन यजिनालाभतद्रूपेणोक्ता वपि प्रकरणांतरेय ना

ज्यभावेनासत्वभूतधात्वर्थात्वस्तोत्तावनाउक्तोदावर्थाधीननिरूपणत्वात्तावनायाम्नइदं विनाभेदानयुक्त इत्याश

यश्चस्र्वकर्मोपस्थानसंरवेदुपादेयात्वय सहकृतस्यापि प्रकरणांतरस्थे भेदकत्वं नास्तीत्येके त्यनेनोक्तं ॥ अम्नुवस ६१

तधात्वर्थस्याउपादानेतावदुदाहरणमाह तद्यथेति ॥ गवामयने प्रायणीयसंज्ञमतिराद्रमस्यैश्यममहस्युद्धर्विशसं

त्मना ३ ना ४ रव्यधात्व ५

तुर्विंशमंत्रं च द्वितीयं एष्या तिलवसंज्ञाः षडाहा विहिताः ॥ प्रकरणांतरेति राज्ञ इत्यादिवचनेनोपस्थाप्य यं कामयंते
तमेते नाप्नुवंतीत्यादिवचनांतरेण फले विधीयत इत्यर्थः ॥ एकस्य शब्दस्य पूर्वकर्म्मोपस्थापनेन्यत्र च विधौ व्यापारा योगा
देकेनोपस्थाप्य परेण विधीयत इत्युक्तं । अस च क्षतधा द्यर्थो अरक्तात्मनाता वनानुक्ता उदाहरणमाह यथा श्रीवेति । वा
रुण्या निष्कासेन तु षेष्या वक्ष्यथ यंतीति वरुणप्रघासप्रकरणस्थेनावभृथशब्देन सौमिकमवभृथाख्यं कर्म्मोपस्थाप्य
तु निष्कासाख्ये संस्कार्ये फलोकेयोपलक्षिते यंतीत्यवभृथात्तु स्नानार्थ्यं ग्रामगमनात् वा दिश्यत्यया तु यहार्थे धातुपरेण
प्रत्ययेन विधीयत इत्यर्थः ॥ तृतीययात्तु षनिष्कासस्य साधनत्वोक्ता वपि निष्कासस्य वारुण्या भिन्नाया योगोपयुक्ता इज्याशे
षत्वात्तु षाणां वाग्नेयादियागानाम् इज्याशेषत्वाद्यथ किंचित्सोमलिप्तं तेनावभृथं यंतीति वत्स्याजशेषेण हवींषि श्रपयं
तीति वद्ध प्रतिपाद्य च रूपसंस्कार्यत्वाविरोधः ॥ प्रकरणांतरोक्तार्थ्यत्व वाच्यस्ते दप क्षमाह यदा विति । संस्कार्योपलक्षण
यादिशब्दः ॥ नाम्ना पूर्वकर्म्मोपस्थापना उत्पत्तिशिष्टिबंधमाशंक्योत्पन्नीत्युक्तं । विधिविपरिवृत्तिरेवोत्पत्तिं प्रहिणोति तत्र
रूपविपरिवृत्तिः ॥ स्वरूपप्रापका वपि दध्यादिवद्विधेयत्वापपत्तिरित्याशयः ॥ नाम्नोत्पत्तिविधिसहचरितेनोत्पत्तिविधिवि

वा·
६२
62

परिच्छित्तिमाशंक्य साक्षाद्विधिविपरिच्छिन्निश्चप्रतिबंधिकानान्यद्वारेतिसूचयितुं बलीयस्त्वेनोक्तं । यावद्विधित्वमनिर्वार्यमू
णं तावत्सर्वस्मिन्नित्निन वस्तुभूतधात्वर्थावच्छिन्नलावनामेव केवलमितियावृद्धस्त्वार्थः ॥ लाघ्यानिष्ठत्वाद्भावनायाधात्वर्थे
दं विनापिभ्रत्यासिद्ध्यानालावनाद्यलेदाङ्गेदोपपत्तेर्ह्या धात्वर्थ प्रत्यासिद्ध्यामाचरणोलयालेदायोगाद्ध्यादिवद्विविधेयत्वा
नपेक्षत्वाद्यागादिस्वरूपाशप्तेर्विधिविषयविपरिच्छित्तिनिरपेक्षत्वस्वरूपविपरिच्छित्त्यायोगात्साम्नाविधिविषयधात्वर्थविपरिच्छेदे
रेवकृतत्वेनोत्सयरोदस्याघ्ययोगात्पक्षद्वयापरितोषेणलावनामात्रलेदं धात्वर्थालेदंवस्त्वमत्तेनाह परमार्थेनत्विति ॥ आ
सन्मुपवेशनस्तुपायस्थापगमनंतौ वाघ्यतया विहिते तयोर्ह्वावोक्षतपरप्रत्ययवोदितेकर्मणितस्येवस्वविहितस्यधा
त्वर्थस्यनामेपादानाद्धात्वर्थोनलिद्यतस्तुकेयिहोत्रादिवन्नाम्नाउपस्थापनमाशंक्यतद्वेषस्याद्यथावक्ष्यतुकिंः ॥ द्या
कंद्या चेष्टनामेति । विधिपदानपेक्षस्यापिनाम्नोविधिविषयक्षतधात्वर्थोपस्थापनोपपत्तिश्चवनार्थोमात्रशब्दः ॥ प्रकरणा
तरस्थस्यापियागस्यप्राशिधिविषयीकृतत्वंविवक्षितंवाप्र कृतत्वोक्तिः । मत्रशब्दस्योपलक्षणार्थत्वाद्वक्ष्यस्यायागलेदपि
वलावनालेदात्वस्यावच्छेदसोमादितिसप्तमाधिकरणेवक्ष्यमाणसोमिकावक्ष्यलावनाधर्मातिदेशाविरोधाकरणा

६२

त्वेन तावच्छ्रूयमाणातिदेशायोगेऽपि च शब्देनोपदिष्टस्य च धर्मसन्निधापकत्वात् कार्यगुणस्त्रयमूतायिहोत्रादिवदति
देशनिमित्तत्वमसिद्धेत्यावश्यश्रुत्यनाम्नो निदेशकत्वोक्त्युपपत्तेरवश्यश्रुत्येवमेवप्रकारः॥ अतो नाम्नोपस्थापनाद्धावर्था
लेदेऽपि तावमालेदस्य प्रकरणान्तरहेतुकत्वात्मकरणान्तरोक्तिरर्थवतीत्याह तस्मादिति। लाघवमपि गमयति लाघवेति॥
नत्वनुपादेयान्वयसहकृतत्वात्सन्निधेर्भेदहेतुत्वेनैवेत्यादिलाघवेन वाक्यभेदहेतुत्वोक्तिरयुक्ता स्यादित्याशंक्याह अ
श्रयेति। नन्वयत्नसमितसंबंधेन क्रियूतत्वपत्या सामाधिकरण्यलाघवं समिदादिपदस्य देवतानभिधायित्वात् गुणहेतुकलेदादौ तावत्प्र
सुपेत्यवादत्वेन यथा समार्थितं तथेदमपि समर्थनीयमित्यर्थः॥११॥ ॥फलं वा कर्मसन्निधौ॥ ॥न तत्र दिहषद्विधः कर्मो
लेदो वर्त्तिष्यत इति लाघवं पक्षमेव लेदहेतुत्वेतिज्ञाना त्वेषां तावत्पर्यवसितत्वात् किमर्थमेतत्सूत्रमित्याशंक्याह एवमिति। सर्वत्र
दहेतुसमासावपि प्रकरणान्तरस्यैवानुपादेयान्वयसहकृतासन्निधिलक्षणप्रकारविशेषोक्त्यर्थमेतत्सूत्रमित्यर्थः। अन्तर
शब्दस्य लेदवाचित्वाद्देशशब्दस्य च विशेषवाचित्वात्प्रकारान्तरशब्देन प्रकारविशेषोक्तिः। एतदेव विवृणोति यो नामेति। श्रुत्वा का
लान्वयवाक्योदाहरणान्नसिद्धवत्कारेऽपि कालस्यार्थकर्मानुरोधेनापादनाशंकेरनुपादेयतया निःशंकत्वान्निमित्तस्य

उत्साहकत्वानादेरपादयितुमपि शक्यत्वाद्देशस्यापि सरस्वतीदक्षिणतीरं उत्तरतः सरस्वतीप्रवाहनयनादिना पादन
शक्तेः फलसंस्कार्यो योऽनूपादेयत्वाशंकायां वार्त्तिकृत् एवं वक्ष्यमाणन्वाक्कालावयवाक्योदाहरणमाह इति। फलं च भेदक
मिति साध्याकारणांतरस्योक्तत्वादुनाशंका निराकर्तुमाह न त्विति। प्रकरणांतरस्यानुपादेयात्वयानपेक्षस्य द्वादशाहीन
स्येत्यादौ भेदकत्वादर्शनात् कथं भेदकतेत्याशंका निरासार्थत्वेन प्रकरणांतरस्य भेदकत्वे फलाद्यनुपादेयमपि सहका
रिनतन्निरपेक्षं प्रकरणांतरं भेदकमित्युक्ते कथं तस्य सहकारितेत्यपेक्षायां महीनादिवत्सन्निधिहेतुः श्रुतस्योद्देश्यत्वावेद
कत्वस्याप्युपबंधस्यानुपादेयात्वये कर्मणो समवायादित्य कर्मसन्निधिशब्देनोक्तमित्यपेक्षाद्व्याख्यानार्थं तद्ग्राह्यमित्याशयः। एवं
त्वासन्निधेरेव भेदहेतुत्वावधारणान्नाम्नाधावर्थोपस्थापनेयनुपादेयात्वये लावनोपस्थापनहेतोः कस्यावित्तावाङ्गावना
भेदं सूत्रयितुं तदुदाहरणस्य नारभ्याधीतस्य लावाद्यप्रकरणांतरशब्देनासन्निधिर्लक्षणया च्युत इति गम्यते। नत्वनुपाद
यमात्रावयत्वात भेदो न कथं चैवस्य स्ववस्य फलवद्देशनिमित्तयोरथ उपादेयतोदाहरणं एवं कं कस्मान्नोपपादितेत्याशंक्य
हतत्वे त्विति दक्षिण वस्यास्वलावदेश सिद्ध विशेषोपलक्षणार्थत्वादापाद्यस्योपलक्षणत्वायोगाद्देशस्योपादेयत्वशंकानु

पाद्यावलक्षणो २

देयत्वशंकाउपपन्नेऽश्रासिद्धिं त्वविना निमित्तत्वायोगान्निमित्तस्यापि कर्मतंत्रोपादेयत्वशंकानुपपन्नेन्द्रेहदेश निमित्ते
उदाहृते इत्यर्थः। सर्वस्त्वार्थस्पष्टीकरणार्थत्वेऽस्य सूत्रस्याधिकरणभेदायोगात्सर्वाधिकरणेऽनुपादेयात्वयस्य भेदकत्वेष्ठा
त्पादिते फलादेरुपादेयत्वात्सर्वाधिकरणविषयत्वं नास्य उपादेयत्वाद्यासीतिः सर्वाधिकरण[illegible]पविषयविवेकार्थं तत्त्व
मिति व्याख्यांतरं लाघ्यानुसारार्थः सूचयितुमधिकरणशद्वः। सर्वाधिकरणेन हि कस्माद्देशादिवाक्यं नोदाहृतमित्याशंका
कालवाक्योदाहरणस्योपलक्षणार्थत्वाद्याख्यातरि निर्दर्शनीयमित्याह सर्वत्रैव स्थितिं दर्शयति तद्यथेति। एकेन संकलि
तसत्वानां लक्ष्य निमित्ततोक्त्यते ऽपरेण त्यास्व सत्वासमाक्षेरिति प्रदर्शनायोदाहरणद्वयं। मा मि शब्दो द्वे वावीशस्य पराहूरेऽत्र
स्पतेस्मिन्देशे सशब्दा परासः। नत्वाग्नेयवाक्येति राज्ञा द्विवाक्यवद्युज्यते रसत्वेधात्वर्थो उपादानाद्वाग्नेयशब्देन प्रकृतिस्तदा
र्शपौर्णमासिकाग्नेययागोपस्थापनोपपत्ते भविना भेदे विधात्वर्थभेदो नास्तीत्याशंकां निराकर्तुमाग्नेयशब्दस्य नामधेयत्वालावा
त्राप्रकृतयागोपस्थापकत्वं संभवतीति परिहारस्सत्वेपि योद्या नामधेयत्वे थत्रुपस्थापकत्वं वक्तुं याग विना वाक्यासमाक्षेरस मा
सस्यासवाक्यस्य वाक्यांतरानन्वयाद्वाक्यांतरस्थ यज्यपेक्षाउपपन्ने रवश्यप कल्प्येनय जिनानामार्थविलक्षणा सब्भूतधात्वर्थस्य

वा.

६४

64

तीतेर्नोपस्थापनं संभवतीति परिहारमाशंकापूर्वमाह यद्यपि वेति। धात्वर्थावच्छिन्नभावनासेद्धोक्त्यार्थकर्मान्तरशब्दः। संस्का
र्यत्वाधिकरणे विचार्यमित्यपेक्षायामाह फलेति। साध्यत्वलक्षणस्योपादेयत्वशंका निरासहेतोर्द्वयोः फलत्वात्फलोदाहरणे
ने संस्कारे [illegible] र्योः उदाहरणमप्युपलक्षितमित्याशयः। किंतर्हि तयोरुदाहरणमित्यपेक्षायामाह तत्रेति
त्रैधातव्यादावाक्ये संस्कार्यत्वाविशिष्टतावा कथं संस्कार्योदाहरणे तत्राशंक्य यजमानेति। दीक्षणीयाद्यर्थ्यं यजमानसंस्का
रलक्षणार्थेन दीक्षणीयाशब्देन विशेषणभूतसंस्कार्ययजमानलक्षणयावसीयत इत्याशयः। प्रकरणान्तरशब्दप्रत्याख्यानार्थत्वे
नाकर्मसंनिधिशब्दप्रत्याख्यानार्थतयानारभ्येतिलाघ्यं प्रत्यवर्षे अनारभ्येति। किं साध्यमिति पूर्वपक्षस्याशयमाह तत्रेति। उपन
यनादिवद्याकर्मकालस्यापि संस्कारत्वोपपत्तेः स्वतंत्रविहित यापि त्रैधातव्यया ज्योतिष्टोमादियजमानस्य संस्कारत्वशंका
तत्प्रयत्नेनोपलक्षितं। प्रारसिकप्रभृतिसंसवेप्यप्रवर्तमानं प्रत्यतो नार्यात् उपेयादिति नियमविधिदर्शनाद्यदाग्नेयं कुर्
र्यादिष्टकाम इति च विधायकस्य फलविषयत्वव्याख्योपपत्तेर्विधायकसंज्ञावच्यवत्कुशंकावानशंक्यत इति सिद्धान्तरा।
यमप्युक्तमाशंक्योपपादयति सिद्धान्तेति। असाधकत्वं तावद्व्यापीति निष्ठाद्यसिद्धान्तसूत्रेण विधीयत्वया उपपन्नाकामनाप

क्या ४

६४

बंधाद्यस्वर्गादिःसाध्यत्वप्रतीतेस्तादर्थ्येनकर्म्मविधाउक्तोऽयमित्यर्थःस्थालिसंबंधात्कर्म्मतोऽपालिसंबंधस्तस्मात्कर्म्मोपदेशःश्रुत्या
दित्यनेनार्थ्यमानंस्वर्गादिप्रतीत्यपलुन्नणीकृत्योद्देश्यत्वदालिसुरथेनतत्तंत्रतयाकर्म्मणःसमीहितस्वर्गादिहेतुतयावगतेरिति
वदतांफलस्योद्देश्यत्वादपितादर्थ्येनकर्म्मविधिरितिवक्ष्यमाणत्वान्नकर्मतंत्रत्वरूपोपादेयत्वेनविधिःसंभवतीत्याशयः।
नन्द्देश्ययोरपिदेशकालयोर्विधेयत्वदर्शनान्नोद्देश्यत्वमात्रेणविधेयतानिराकर्त्तुंशक्येत्याशंक्याह विधीयमानंहीति।देश
कालयोःसिद्धत्वकाररूपोद्देश्यत्वेऽपिव्यापारमिकप्रवृत्तिविषयत्वापादकप्रयोजनाकाररूपोद्देश्यत्वाभावात्तद्रूपतयासिद्धत्वक्र
त्यनिर्द्देशेऽपिकर्म्मांगत्वेनाप्राप्तत्वाद्विधेयत्वोपपत्तिःफलस्यतुप्रयोजनाकाररूपेणोद्देश्यत्वान्नविधेयत्वोपपत्तिरित्याशयः। विधा
यकस्यफलविषयत्वात्फपगमेकर्म्मविषयत्वायोगात्तस्यनिष्फलत्वंस्यादित्यभिधानार्थंनहीतिसाध्यत्वावशे क्रियापिवेति। ह
यंतर्हिविधीयतामित्याशंक्याह नचेति।यद्यपितापितामहःसोमेनपिबेदित्युद्देश्यमानयोश्चविधीयमानयोरर्थयोर्व्याख्यानाका
त्वेनानन्वयापत्तेरवश्यमेकोद्देशेनेतरस्मिन्विधेयेफलस्योद्देश[illegible]योर्नोनत्यायेनोद्देश्यता[illegible]वगमात्कर्म्म
णोविधेयतावसीयतइत्यर्थः। फलोद्देशेनकर्म्मविध्युक्तेःप्रकृतोपयोगमाह तत्रश्चेति। नतुफलस्योद्देश्यतायाःस्वर्गकामा

बा.
६५

धिकरणस्थेचोक्तत्वादङ्गेदहेतुत्वसंभवेपिसंस्कार्यस्योद्देश्यतायाः क्वचिदप्युक्तत्वान्नसंभवतीत्याशंक्यतस्यापिफलवत्संस्का
रककर्म्मप्रतिपत्त्याधायाभ्युपगमाद्विधेयत्वेनाप्राधान्यापत्तेरुद्देश्यत्वावगमादङ्गेदहेतुत्वमतिदिशति। एतेनेति। फलस्यचाप्युपादेय
त्वानभ्युपगमेनित्यप्रयोगव्यतिरिक्तफलकामनातःप्रयोगकल्पनानुपपत्तेर्नित्यप्रयोगेफलकामनाप्रसंगात्कामयेक्षितिवा
श्रुतेःकर्म्मांगत्वेनकामनाविध्ययोगान्नित्यानित्यसंयोगःस्यादित्युक्तिसमानार्थमपिचेतितिलाष्टंव्याचष्टे। किंचेति। प्रथमार्थेतसिः
तस्मादित्यधिकरणार्थोपसंहारतात्पर्यंव्याचष्टे तस्मादिति॥ ४१॥ सन्निधौत्वविभागात्फलार्थेनपुनस्तस्तुतिः॥ ॥ अनुपादेयान्वयमात्र
स्यासन्निधिसहकृतस्यशेषत्वेफलमात्रप्रत्युदाहरणानुपपत्तिमाशंक्याह सर्वेषामेवेति। स्विष्टकृतंयजतीतिविहितस्विष्टकृद्या
गसन्निधौशेषादितिवाक्यांतरेणशेषसंस्कारार्थत्वेनस्विष्टकृद्यागविधानात्संस्कार्योदाहरणत्वात्ताध्यालोचनयैतद्वहुएवफलवा
क्वेविपरिहत्तिहेतुरिति। कस्यचिदिच्छंकांनिवर्तयितुंसाध्योदाहृतफलसद्भावेप्युदाहरणांतरं। न्यायशास्त्रेसर्वपदाशंकाविनाश्च
त्युदाहरणानर्थक्यापत्तेस्तस्यदर्शनार्थंकिंप्राप्तमितितिलाष्टंव्याचष्टे सर्वेचेति। स्वरूपतःप्रामस्थायाथन्यसंबंधित्वेनविध्यनुपपत्तेः
नविधीयमानत्वमारादेणकर्म्मांतरत्वापत्तिरित्याशंक्यहष्टवाक्येनोपपादयति आहचेति। सर्वस्मात्कर्मणोयस्यालेदास्यपग

६५

65

मेविहितविध्ययोगादत्तुवादापत्तेरनुवादश्चव्यवच्छेदोपबंधलक्षणोद्देशत्वंयथवादर्श्यमानश्योद्देश्यत्वापत्तेर्देशाद्यद्देशेत्वक
र्म्मोद्देशासंसत्वाद्धेदइत्यर्थःउत्तराईद्यावष्टेअनूद्यमानानिहीति।ननुदेशाद्यत्वयित्वेनविधानेपित्वरूपानुवादादकर्म्मातर
त्वेनविध्यतीत्याशंक्याहदेशादीति।पूर्वपक्षमुपसंहरति तस्मादिति।उत्पत्तिविनियोगविधिद्यापारभेदाडत्यन्तानुवादविनि
योगविध्योर्य्यौगपद्यदोषंपरिहरन्सिद्धांतमाह अनीति।उत्तराईद्यावष्टेअगत्याहीति।ननुदेशादीनामुद्देश्यत्वादनुवाद्यत्वाव
गतेःकर्म्मणस्तानिप्राप्तिउपादेयत्वेनविधेयत्वाद्भेदापत्तिमाशंक्याहनवापीति।विध्यनुवादशब्दौवयस्तयांतत्वाकर्म्मप्रत्यनुत्या
वाविधेयानुवाद्यवाचिनौ।श्लोकंद्यावष्टेयद्यपीति।सिद्धांतमुपसंहरति तस्मादिति।नाद्यादविभागशब्दस्यसन्निहितपतिनिर्देश
विषयत्वमालासमानेनिराकर्त्तुंसूत्रंद्याख्याकरोति विपरिहत्स्निरेवदेति।लाद्यकृद्याख्यात्ववेष्टौ।विशेषणोक्तपर्योतिदृशोयितुमाहवि
शेषेणविति।एतच्छब्दद्याभिहोत्रशब्दवद्धर्म्मलक्षणार्थत्वेनातिदेशकत्वात्कर्म्मान्तरेविश्वजिदादिवदपूर्वत्वोदितत्वात्सामहविष्कत्वं
पूर्वपक्षप्रयोजनमाक्षिपतिप्रयोजनेविति।समाधत्ते तदिति।हत्यंतरोक्तभेदकारणवत्तद्वत्पर्यासम्बर्ब्बदूषयितुंलाघोक्तमपद्वित्वं
तावदुपसंहरति।एवमिति।उपदश्यतीति।हत्यंतरेविति।फलाद्यनुग्रहमात्रार्थत्वादित्यादिशब्ददर्शनात्फलशब्दोउपादेयमात्रविष

वा. ६६

66

यो विज्ञायते। अथ न्यलाघवं तु कालशब्दस्य वा याक्तिचारणे लेदेशब्दे लेदस्य ते। सरूपाणामेकशेष इति स्मृत्या लोचनया शेषशब्द
लेदावगते रेकस्मिंश्च शब्दे शतक्रत्वाप्सु ञ्चारिते र्थलेदाप्रतीतेरत्या सख्य लेदकत्वायोगात् संख्याया आर्थगतायाः कर्मण्येकस्मिन्न सं
लवाङ्गे दकत्वे गुणांतरी वा पत्नेः शब्दगताया एकशेषस्मृत्यवगताया लेदकत्वस्य वाच्यत्वात् श्वाश्वशब्दलेदकत्वाहृयोः शब्दांतरानतरी
वायत्करणांतरत्वालावे पि वृाग्नेयमष्टाकपालं निर्वपेद्दर्शपूर्णमासयादाव पादेयात्वयस्य विधेयत्वापादकत्वाङ्गे दकत्वावगतेस्तत्व
तिबंधकप्रत्यभिज्ञापनमात्रेण करणांतरस्याद्यापारीदित्यर्थः। शास्त्रांतराधिकरणसिद्धांतसूत्रे चलेदकत्वउष्टयपरामर्शादिति
हेत्वंतरं चशब्देन सूचितं। द्रव्यवृत्तिता त्विति। अथयत्वाद्य मिति कात्यायनस्मृतिं द्रूषयितुं सत्वांतरेषु यौगपद्यादिति शब्दाधिकरणपूर्वप
क्षहेतोरनैकांतिकत्वोक्त्यर्थं सूत्रं पठति। नथा चेति। यथादित्यस्य नानादेशेषु युगपदुपलंलेपि न लेदस्तथा शब्दस्यापीति सूत्रार्थः। एक
शेषस्मृत्या लोचनाद्भेदावगतिं द्रूषयितुं तत्रत्यं सिद्धांतसूत्रं पठति। संख्येति। अष्टौ गोशब्दा इति संख्याव्यवहारालावादेक एव नित्यः श
ब्द इति सूत्रार्थः। तत्प्रत्यभिज्ञानेन वस्तूपाधिलेदाद्भेदालासं वक्तुं षष्ठाधिकरणसिद्धांतसूत्रैकदेशं पठति। वद्घातिचेति। विहितद्रव्या
पचारे द्रव्यांतरेणानुष्ठानस्य यागस्याद्यतिरेकादष्टाकपाल इत्यत्राग्निदेवत्यत्वरूपाद्विलागादाग्नेयशब्दाद्विलागाभ्यासे प्रत्यभिज्ञानाज्ज्ञो

६६

त्ववदैककार्य्यमिति वदन्नुक्तप्रकारेणोत्पत्तिज्ञायमानानामभेदं वदन्तीत्येवंजातीयकशब्देनोक्तं। संख्याभ्यासयोश्च शब्दान्तरान्तर्भा
वद्दूषणमुपहासस्पर्द्धमुपसंहरति। तस्मादिति। करणान्तरस्य भेदकत्वाभावमुपहासस्पर्द्धं दूषयितुमाह प्रकरणान्तरत्वाद्धेति। अनुपा
देयात्वया उपादेयत्वावगमे च प्राप्तिविषयत्वाद्विधेः प्रकरणान्तरशब्देनोक्तं प्रकृतत्वाद्विधिविच्छेदं विना विधेयत्वानवगतेः प्रकरणान्तरमेव
विधेयत्वापादकत्वान्मुख्यं भेदकारणमित्याशयः। किमर्थं तर्ह्यनुपादेयात्वयापेक्षेत्याशङ्क्याह तत्रेति। येन कारणेन प्रकरणान्तर
शब्दोक्तमप्रत्यभिज्ञानं विना भेदो न भवतीति तेन कारणेन भेदस्याप्रत्यभिज्ञानहेतुकत्वात्प्रत्यभिज्ञापादकानुपादेयत्वद्योतक
यच्छब्दोपबन्धवारणायानुपादेयापेक्षेत्याशयः। यद्यैकं चेति फलाद्यगुणशब्दान्तरसंज्ञास्य भेदप्रमाणाभावचतुष्टयमेकत्वहेतु
त्वेनोच्यमानं फलादिचतुष्टयं भेदकमित्यस्यार्थस्य ज्ञापकमिति दृष्टान्तरत्वेनोक्तं तद्वाक्यान्तराधिकरणेऽभ्याससंख्याप्रकरणा
न्तराभावानामसंभवान्न तु फलादिचतुष्टयस्य भेदहेतुत्वादित्युपहासस्पर्द्धमाह यद्यपीति। एकत्वहेतुभूतं तत्तद्विपर्ययचतुष्टयं
चेति विग्रहः। शब्दान्तरलक्षणमुपसंहरति। तस्मादिति। फलस्य भेदहेतुत्वनिरासार्थं यथोक्ता इत्युक्तं। चतुष्टयनिरासायैवकारः
न तु तासामसिद्धान्तेऽपि संज्ञायाश्चाख्यावर्थभेदद्वाराभावनाभेदकत्वेन शब्दान्तरान्तर्भावात्संख्यायाः प्रकर्म्मभेदं विना विध्य

संबंधाद्भेदकत्वेन गुणांतर्भावाद्द्वार एव भेदहेतवः स्युरित्याशंक्य भेदाभिधानं प्रतिजानीते तत्रापि द्वित्वेति । संज्ञायाश्च शब्दांतरा
त्संख्यायाश्च गुणाद्भेदोऽभिधीयत इत्युक्तेऽध्यायोपक्रमेऽनयोश्चावसरे भेदवचनमयुक्तं वा संज्ञासंख्याधिकरणयोरेवानयोर्भे
दो वाच्य इत्याशंक्य तत्र वाच्य एवाथवा समानाकारेणानुक्तत्वादिदानीमवसरलाभादभिधानमिति वक्तव्यश्च मन्नित्यनेनोक्तं । अभि
धत्ते स्वरूपेति । शब्दांतरस्यानुरंजकधात्वर्थभेदेन भावनाभेदकत्वायोगादिति शब्दा च सिद्धत्वयोर्न स्याद्धात्वर्थस्य भावनानुरंजक
त्वाप्रतीतेः स्वेन स्वोपरक्तभावरूपेणानुरंजकत्वावगमात् संज्ञायाश्च स्वोपरीतभावरूपाभिधायित्वाद्द्वार्थैकोपाधानेकसंज्ञान
र्थक्यापत्तेः धात्वर्थभेदगमकत्वेऽपि देवतोद्देशद्रव्यत्यागादिभावार्थांतरविलक्षणरूपाभिधायित्वाद्द्रव्यजन्यादेर्विलक्षणरूपे
संबंधग्रहणाद्द्वा विवेकोपपत्तेः संज्ञायाश्च शब्दांतराद्भेदः विधेयरूपभेदे शब्दांतरादिव्यापाराऽनुपस्थितिज्ञापनेन भेदकत्वावगतेः
संख्यायाश्चाभ्यासजन्यकर्मणि समवायादेकसंख्येऽपि कर्मणि विध्यंतरोत्पादितकर्मांतरोपजननापेक्षया समवायोपपत्तेर्गुण
वत्स्वोत्पन्नकर्मसंयोगसंभवेनापूर्वकर्मोत्पत्तिज्ञापकतया भेदकत्वायोगाद्गुणभेद इत्यर्थः । अभ्याकथ्यावष्टे संज्ञा हीति । एक
संख्येऽपि कर्मणि कर्मांतरापेक्षया संख्यांतरसमवायसंभवे कथं भेदकतेत्याशंक्य प्रमाणांतरेणोत्पन्नविषयत्वेनावगतस्य

विधेरनेकविषयत्वमात्रं संख्ययावगम्यत इति परिहारसूचनार्थं तु गपदित्युक्तं। पूर्वस्मिन्कर्मण्यसंभवो यद्यपि तत्सर्वासंभ
वं वा जिनादिष्वायास्तावेप्यगत्वा विशेषात्संख्याया अप्यंगत्वापरपर्यायगुणत्वापत्त्र वा योगात्कथं गुणत्वे दृष्टत्वाशंकानि
रासायोत्तरशब्दः॥१३॥ ॥आग्नेयसूक्तहेतुत्वादभ्यासेन प्रतीयेत॥ ॥उदाहरणं विविनक्ति माह। आग्नेय इति। तत्रेति संदेहं ला
घवं सकृदसकृदनुष्ठानचिंतायां स्वत्वानिर्विंतासारूप्यात्सूत्रेण संगतेरयुक्तमाशंक्य भेदाभेदफलेऽनिहारा भेदाभेदाश
यत्वेन व्याचष्टे। किमिति। अपवृक्तवाक्ये नैककर्मासंभविपौर्णमास्यमावास्याकालत्वलक्षणगुणद्वययोगादाग्नेयद्वयविध्यवगते
रेकस्य कालद्वयानन्वयात्कालद्वयविशिष्टस्यावामावास्यावाक्ये पुनःश्रुतिर्वायोगाद्यैमावास्याकालकआग्नेयउत्तयं त्वसो
मयागात्सायट्टैवाप्यतेन समानायत्वकदाचिद्यातश्रूपेवचतियोथफलत्वलक्षणार्थो वार्तिकाद्वयवोद्याख्ये यः प्रयोजनासंभवे
पिकर्मांतरत्वाउपपत्तिःसूचनायानवक्लृप्तिः। फलार्थे नेत्यस्माद्विधेरनुपादेयत्वाद्वयसंभवएवं निषेधस्तदुदाहरणत्वशंकानिरासा
र्थत्वेनाधिकरणस्यानंतरसंगतिसूचनार्थं तु शब्दव्याख्यानार्थं च सिद्धांते नोपक्रमते। तत्रेति। तन्निष्टत्वार्थत्वेन पूर्वपक्षसूत्रं व्याचष्टे
इतीति। अभ्यासो क्रियाख्याउ द्विरित्युक्तं। अभ्यासोक्याष्टनिमित्तार्थताख्यवाक्यद्योक्तेति शंकां निवर्तयितुमाह। प्रयोगेति। प्र

सं

सं २

वा०
६८

68

र्वपक्षयोरनभ्यासइत्याशयः॥ अविभागात्तु कर्मणो द्विरुक्तेन विधीयत इति सिद्धांतसूत्रमवतारयति नन्वेति। कर्मैक्यसिद्धौ
नेमिलाकाद्वयस्य विधायकत्वोक्तेः। भेदमात्रवस्सूचनार्थः। पक्षांतरशब्दः। अस्या साधिकरणस्यायं वैषम्योक्त्यर्थं ननु शब्दं व्याख्या
पूर्वं कर्मणो विभागादिति हेत्वर्थं व्याचष्टे उक्तमिति। इष्टदेवताद्यवशंकानिरासार्थं वैनाद्य विभागो क्रियावष्ट इष्टेति। ननु
कर्मणः श्रवणिकत्वेनाविभागशब्दोक्ताया अनुपपत्तिज्ञायाः साध्यं मा विषयवाक्यान्नाभेदबोधकत्वोपपत्तिरित्याशंक्याह यदीवेति। स्व
रूपभेदस्य अयोगांतरे श्रुतवाक्यविहितस्याग्नेयस्य विशेषाद्विधेयरूपभेदोऽत्र विवक्षितः। समस्तत्वादिज्ञाया निरस्त इत्याशयः।
न द्वितीयान्वयेन पुनः श्रुत्या कर्मभेदमाशंक्य तन्निरासार्थं द्वेन द्विर्वचनेनैकमेव कर्म विधीयत इत्येवं लाघवनिष्ठात्यक्तपराग्मेनन तद्धि
रुक्तेनेति सूत्रावयवव्याख्यामार्थनेनीति। भाष्यं [illegible] धा व्याचष्टे तस्मादिति। विकल्पस्याष्टदोषत्वेनापरितोषादाह अथवेति। समुच्चयं
वक्तुमेकेन वाक्येन विहिते वाक्यांतरानर्थक्यमाशंक्य युगपदित्युक्तं। क्रमेण वाक्यद्वयप्रवृत्तौ सर्वेण विहितेपरानर्थक्यस्य नित्य
वाक्यद्वयेर्युगपत्प्रवृत्तेर्न वाक्यांतरानर्थक्यमित्याशयः। युगपत्प्रवृत्ता वाक्यांतरानर्थक्याभावः। अपि वा त्वाम्नि संयोगादव्यथा स्यादा स
वदर्शनं तथा लाघवविभागे स्यादिति षष्ठाधिकरणसिद्धांतसूत्रावयवं वक्ष्यमाणेन दृष्टांतेनोपपादितं। अद्धिकामाः सत्रमासी

६८

रन्निति कामिपदस्थेन बहुवचनेन क्वाह्निकामूबहुत्वोक्तेः प्रत्येकस्य ह्निकामत्वावगमात्प्रत्येकमधिकारस्तु आख्यातस्थेन बहुव
नेन कर्तृबहुत्वोक्तेः प्रत्येकं कर्तृत्वावगमादपि प्रत्येकमधिकारः इत्युत्पन्नाव निर्ज्ञातकर्तृसंख्ये कर्मणि कर्तृबहुत्वसंयोगादित्य
वयवेनोक्तेः प्रत्येकं कर्तृत्वे कर्त्रन्तरानर्थक्यमाशंक्य यथा सवस्थ इद्यस्य गवादेर्युगपद्बहुशिरोदर्शनं नान्यानर्थक्यापादकं तथा
सावस्थकर्मणो विनागेएथकर्तृत्वेपि न कर्त्रन्तरानर्थक्यमिति वक्ष्यते। युगपत्सर्वेत्निमात्रेणानर्थक्यपरिहारः कथमित्यपेक्षा
यामाह नचेति। हेतौ चशब्दः। नतु विहितमेवेत्यादिसाध्येणानर्थक्यमाशंक्याभ्युपगमेनोत्तरं दत्तं तदुपपादयति। काममिति प्रत्यभि
ज्ञानमनाहृत्यार्थान्तरं चेद्वाच्यं तदा चशब्दार्थानित्यत्वापत्तिरित्याशयः। तस्मादिति फलतः सिद्धान्तोपसंहारस्तार्थं व्याचष्टे तस्मादिति
वाक्यद्वयेनैककर्मविध्युक्त्यानर्थक्याभ्युपगमयोरल्पासाधिकरणविरोधमाशंक्याह सर्वमिति। आनर्थक्यापत्त्यैव वाक्यद्वयेनैक
कर्मविधेर्निराकाङ्क्ष्यादानदृष्टमुक्तिः॥ ॥अथार्थवादप्रकरणमिति॥ ॥अयं शब्दस्यार्थवादाशयत्वोक्त्यर्थसाध्योपपादनं सर्वमुच्यत इ
त्याशंकाराध्यमाग्नेयविधिशेषत्वस्याउक्तत्वादयुक्तमाशंक्योपपादनं सर्वं व्याचष्टे सर्वथेति। चाशब्दव्याख्यानार्थोथवेति साध्या
ख्यार्थः सर्वथाशब्दः। स्वरसेनाग्नेयादिविशेषत्वं संभवतीति इत्याशयः। नत्वर्थवादार्थत्वमात्रेणोक्त्याप्रयोजनत्वं च सिद्धेरर्थवादके मध्या

वा· विशेषोक्तार्थापरिचोदना नत्वक्तेत्याशंक्याह परिचोदनाविति । नार्थवादकैमर्थ्यविशेषोक्तार्थेयं परिचोदना किंत्वर्थवादार्थव

६९ स्यायोगात्कर्मान्तरविध्यर्थत्वे वाभ्युपगतहेत्वापादनार्थेत्यर्थः । स्तुतं व्यक्तत्वानर्थक्ये हष्टाते क्तार्थे स्येति लाघवमत्राप्यमानविषय

त्वेनाक्षिपति न चेति । विषयो क्त्यासमाधत्ते नतान्विति । अर्थवादे व्यक्तत्वस्य त्वेन स्थितसदनर्थकमित्युक्तोर्थवादत्वेनैवार्थवत्त्वं लविष्यतीत्वा

शंक्य विध्युद्देशाद इत्युक्तं समाधेविध्युद्देशोर्थवादान्वयोपपत्तेर्विध्युद्देशमध्येर्थवादोनर्थक इत्याशयः । ऐंद्राग्नमेकादशकपालं

मावास्यायांलवतीत्यैंद्राग्नविधिशेषत्वादाग्नेयात्यैंद्राग्नस्तुत्यर्थाग्नेयपुनःश्रुतिरित्येवं सूत्रेणपरिहारोक्तार्थं तद्व्यत इति । छंद्या

वष्टेति तद्वेति । येयमिह सिद्धान्ते प्रशंसा कर्तुं पुनःश्रुतिराश्रिता सा सव्यागिति क्रियाविशेषणत्वान्नपुंसकलिंगेन मध्यक्तशब्देनोक्तेत्य

भित्यपेक्षितेसहे त्युक्त (पुनःशब्दस्याग्नेयपरामर्शार्थत्वादिंद्रसहितेनाग्निनाग्नेयस्यौति । प्रतीते रैंद्राग्नस्यैत्यर्थः । यदाग्नेय इति वाक्या

न्तरेणाग्नेयस्य केवलदेवतात्वावधारणात्कथं तेनैंद्राग्नप्रशंसेत्यपेक्षायां प्रशंसेत्युक्तं । आशास्यवाक्य गिरसो वा इत्यत्र मासि यंलो

कमायन्नित्याद्यर्थवादशब्दसहितवाक्यान्तरावधारितत्वेनाग्नेयस्य प्रशंसात्वावगमादाग्नेयएवतावदग्निदेवत्यत्वात्प्रशस्तः ऐंद्राग्न ६९

स्त्विंद्रसहिताग्निदेवत्यत्वान्नतोपि प्रशस्त इत्याग्नेयोक्तैंद्राग्नप्रशंसार्थतोपपन्नेत्याशयः ॥ २४ ॥ ॥ इति श्रीमच्चंद्रिकाडमंडनप्रतिव

69

वा॰ संतसोमयाजिसद्दमाधवात्मजसद्दसोमेश्वरविरचितायां तंत्रवार्त्तिकटीकायां सर्वानवद्यकरण्यां न्यायसुधा

७० ख्यायां द्वितीयाध्यायस्य तृतीयः पादः समाप्तः॥ ॥श्रीसिद्धेश्वर्यै नमः॥ ॥२२४०॥शतश्लोकाः॥ ॥ ॥ ॥

२०५०

70

राम

७०

श्लो: १०० पत्र ८.

